वप्रतियोगिशाब्दानुभवे तदुच्चारणाजन्यत्वमाकांक्षा तदुच्चारणापदं चोपस्थितिपरमो निम्नो कानुरोधात्तथा नानाकांक्षेता दृशज्ञानेन तद
जन्यत्वमिति न सिध्यसिद्धिव्याघात इति दोषात्तमाह। किंचेति। नन्विदमप्ययुक्तं उभयसंसर्गतात्पर्ये इष्टापत्तेः। अन्यथा प्रसंगाभावात्।
तदुच्चारणाजन्यता सर्वविषयसंसर्गावगमप्रागभावस्य उक्ताकांक्षामेर्ताविवक्षितत्वादिसस्वारसादपरदोषमाह। अपि चेति। प्रकृते प्रागभा
वाभावस्य हेतुत्वतराभावव्याप्यतयात्तत एव कार्याभाव इति किमाकांक्षया सहकारिणेत्यर्थः। नन्विहान्याभावाद्भावएव न कार्यस्य किंतु प्राग
भावादेवेत्यत आह एवं वेति। ननु यथा सकलकार्यप्रयोजिकारणत्वेन प्रागभावः कोऽम इति हेतुः एवं विशिष्टज्ञानं प्रत्यपि कारणाहेने तिशेषविशेष
णाज्ञानस्यापि सतिसंसर्गाग्रहरूपायो [redacted]रन्यथासिद्धिस्यत आह। नचैवमिति। नत्वनुमिसादावपि तद्धेतुत्वखेन मान्यसामग्रीसामाद्यि मा
तिभावः। ननु तत्र न प्रागभावाभावस्वाधावतार निवृत्तौ तत्रैवानुमिति दर्शनादिसतो दोषात्तरमाह प्रागिति। ननु सात हेतुतामोत्रे साधारणस्या
दि सत्त्वे दोषान्तरमाह उपस्थितेति॥ यस्येति पस्यपदस्य समभिव्याहृतयस्यव्यतिरेकप्रयुक्तान्वयाननुभावकत्वं तस्य पदस्य तदर्थवसानमन्व
याननुभावकत्वमाकांक्षेत्यर्थः। अत्र च यस्य पदस्य पदान्तरव्यतिरेके सत्त्वपदस्य पदे घटोपस्थितिपरे। अतो न मौनिश्लोकादेवव्याप्तिः। पदस्य
स्वभावत एवाननुभावकत्वाद सम्भवश्च न भवतीति स्मर्तव्यं तेन घटो भवतीति वाक्ये रक्तसाकांक्षा न भवति रक्तपदसमालिव्याहाराभावात्।

६ शाब्दबोधत्वादिः त्वमिसादि· तथा च कार्यत्वावच्छिन्नकारणं प्रागभावः सामान्यसामग्रीवि
शिष्ट[illegible] ज्ञानत्वावच्छिन्नकारणं योग्यतादिश्च कारणं भवतीति भावः

५ सामान्यसामग्रीति· सामान्यसामग्रीमुद्रया
५ शाब्दप्रसपि योग्यतादिके कारणस्यादि[illegible] भावः

हेतुरिति कथमेतेन त

मि॰ स्रा॰ नापिजनितान्वयबोधे ऽतिव्याप्तिः तदा ऽन्वयाननुभावकत्वाभावात्। अत एव स्वरूपयोग्यतातो स्याभेदः सा हि यावत्फलस्थायिनी जनित
१९ फलेपि तिष्ठति इयं तु फलजननात्प्रागेवा किंचित्तु सहकार्यभावगर्भा योग्यता इयं तु पदस्वरूपसहकारिविशेषाभावगर्भेति ततो भेदः केचि
त्तु अस्तु स्वरूपयोग्यता न चैतावता ऽहेतुरिति॥ इयं स्वरूपयोग्यतैव न वैयर्थ्यहेतुः किं त्वेतज्ज्ञानमित्यन्ये॥ ननु यद्यनुभवजननात्प्रागेवेयं तर्हि
प्रागभावपर्यवसन्नैवेति तत्पक्षोक्तदोषापत्तिः। न। अत्यंताभावप्रागभावसाधारणागर्भत्वादस्याः। सर्वत्र स्वरूपयोग्यतायां अनादिसंसर्गाभा
वगर्भत्वात् न चोक्तर्थो ह्यनुपपत्तिरेवमपीति वाच्यं सत्संबंधिकपदांतरसमभिव्याहारात्तात्पर्यग्रहादेवाकांक्षापादुत्थितत्वादिति न किंचिदे
तत्। अनेन रूपेण प्रयोजकत्वमित्यसाधारणं। न हि स्वप्रागभाव एव हेतुरेतावता लभ्यते। किं त्वन्वयानुभवस्य प्रतिबंधकतया तदभावस्य
संसर्गाभावत्वेन कारणत्वात्। न च ध्वंसो ऽप्येवं हेतुः स्यादिति वाच्यं। ध्वंससाधारण्यवच्छेदेनापि हेतुत्वे तत्काले सामग्र्यंतराभावादेव कार्या
भावात्। न त्वन्वयानुभवध्वंसकाले पदोपस्थित्यादिकमस्ति। वस्तुतस्तु पदांतरव्यतिरेकप्रयुक्तत्वविशेषणादेव ध्वंससाधारण्यं नास्ति राम॰
। न हि हेत्वभावे कार्यध्वंसः किंत्वनादिसंसर्गाभावमात्रं। ननु ।[illegible] इतिपदस्य तात्पर्यभ्रमेण [illegible] ऽन्वयबोधे ऽपि तत्तात्पर्यग्रहे ऽप्यन्वय १९
बोधो न स्यात्। अन्वयानुभवाभावरूपप्रतिबंधकाभावात्मकाकांक्षाविरहादिति चेत्। न। समभिव्याहृतपदेनैव वारणात्। समभिव्याहृत
यस्य पदस्य समभिव्याहृततत्पदांतरपदांतरव्यतिरेकप्रयुक्तान्वयाननुभावकत्वं तस्य तदर्थ्यवसानं मा स्वाय दांतरव्यतिरेकप्रयुक्तेन पादानुभवाभावे ध्वंस इयमाकांक्षेति लक्षणे द्वितीयदलोपादानसमभिव्या =
हृतपदेनैव वारणादित्यर्थः। अत्र देवो ऽयं ताराज्ञा समभिव्याहृतपदांतरव्यतिरेकप्रयुक्तान्वयानुभवाभावरूपस्य आयानुधाननुभावकत्वस्य विवक्षणे नापि नानुपपत्तिः नेयं घटमानयेत्यारोअ
द्योतरेशाद्योतशयतिः नो दृशाभावस्य तदानीमभावात् अस्य भावादत्वात्तदोषापित्तदोषतादवस्थ्यान्। एवं चायमेती स्यादौ पुरुषाचयबोधे पित्ता[illegible] पुत्रानयबोधाभावमादयाकांक्षा सपपादे ति

पदैर्नैववारणात् । समभिव्याहृतपदस्य तदेकवाक्यत्वापन्नत्वाभिप्रायविषयत्वपरत्वात् । न चात्र मोक्षपुरुषान्वयबोधे वक्तृगाज
पदेषु तत्पदैकवाक्यताभिप्रायसंभवः । नन्वेवमाकांक्षाज्ञानहेतुत्वमसंभावि तथा हि यदि प्रतिबंधकाभावरूपाश्रयसत्त्वेऽत
स्यात्स्वरूपसत एव कार्यमात्रहेतुत्वेन ज्ञानहेतुत्वमानाभावात् । न च तदभावेऽपि तज्ज्ञानात्कार्यमिति तज्ज्ञानादरः सति प्रतिबंधके कार्य
स्यासंभावितत्वात् । किंच तदभावेऽपि तज्ज्ञानात्कार्ये न तावद्दृष्टः कर्मत्वमित्यादौ न स्वारोपितदृष्टेनेत्यादौ वैश्यमानत्वात् । नाप्ययमेतीति
वाक्ये ताद्रूप्येतात्पर्यभ्रमेणोपगतार्थत्वात् । अपि वाकांक्षयोः संशयसाधारणज्ञानमात्रेण हेतुरिति निश्चयो वाच्यः । तस्मिंश्च संशयितज्ञ
ज्ञानत्वेन तदपेक्षया नाकांक्षाज्ञानाभावस्यैव लक्षणैः कारणत्वकल्पनौचित्यादिति । मैवं । पर्यवसितं हि तत्प्रतिबंधकत्वं न तु तदभाव
त्वेन हेतुत्वं । अत एवोक्तं वक्ष्यते इत्यादिना हि प्रतिबंधकाभावस्य विशेष्यगणान्तराविच्छेदेव हेतुत्वे इहहेतुपदान्तराभावप्रयुक्तत्वविशेष
णावच्छेदेन हेतुत्वात् । अन्वयानुभवे च जातेनाकांक्षाज्ञानमस्ति । अत तत्तत्र एव कार्याभावः परत्वेन च यानुभवनियतत्वादन्वयानुभ
वः प्रतिबंधकमुच्यते । अत एवाकांक्षाया हेतुत्वेमामाभावेन तज्ज्ञानकारणानन्च यदि नाकांक्षाहेतुः किं तु तज्ज्ञानं तदान्वयानुभवे जाते पि
पेक्षापदान्तरविरहप्रयुक्तोऽन्वयानुभावकत्वव्यतिरेकः इति शब्दबोधिते ऽन्वयबोधायन्तिः पदान्तरव्यतिरेकप्रयुक्तोपदेशान्वयानुभ

वाभावस्तच्छाब्दबोधेतदपर्यवसानस्यहेतुत्वंवाच्यंननुसामान्यतःइतिप्रसंगात्।तदिदमुक्तमाचार्यैर्लक्षणेश्रोतारितद्भावआ
कांक्षेति।नचस्वस्यान्वयानुभवेजातेपरोक्षशाब्दत्वात्तदनुभवाभावज्ञानमस्तीतितत्राकांक्षास्तानासम्भावात्।।नन्विदमपितदापद्येततद्वि
लंबेनक्वापिकार्यविलंबः।नचैवंतात्पर्याग्रहतात्पर्यत्वादिसुक्तमितिवेत्।नद्विविधंहितात्पर्यंपदेऽर्थेच।तत्रकिंतेय्याहशंगहितंप्र
योज्यकंतदुक्तेनहिराजपदमपरस्यपदार्थान्वितराजपरमितिगृहीतेपिपुरुषपदेनपुत्रपदेनवाविनाराजपदमननुभावकमितिसं
शयोयमि।संशयेसत्यपिवानशाब्दधीरूसंघतेतस्मादुक्तंतात्पर्यात्राजपदस्यपुत्रपदंविनाऽन्वयाननुभावकत्वमित्येवमात्मिका
याश्राकांक्षापाज्ञानस्यनान्यथासिद्धिः।तदयंसमुदायार्थः।यत्पदोपस्थितेरेकवाक्यतातात्पर्यविषयकयत्पदोपस्थितिव्यतिरेके
णपदोपस्थितेःश्यान्वयविषयकतात्पर्यविषयानुभवजनकत्वाभावःतदीयतादृशान्वयानुभवजनयितृत्वेनतत्पदस्यतदननुभावकत्वं
तत्पदाकांक्षा।एवंचसैंधवपदेनअतात्पर्यविषयतुरगप्रतियोगिकेविपाकर्मभावादिरूपेऽन्वयेएकृष्णादिरूपतत्तात्पर्यविषया
न्वयानुभवोनजन्यते।तत्राकांक्षास्त्येवपरंतुतुरगतात्पर्याभावादेवनान्वयबोधइतीतरपदार्थान्वितंतुरगान्वयपरंसैंधव
पदमित्येवमाकारोक्ततात्पर्यग्रहविलंबेनकार्यविलंबात्तात्पर्यग्रहःकारणं।यत्रतुपुरुषपुत्रराजादिपदानामुक्तरूपतास

येग्रहेपि राजपदैकवाक्यताभिप्रायविषयत्वज्ञानात्पुरुषपदेन नान्वयबोधः एकवाक्यताभिप्रायविषयत्वज्ञानाच्चपुत्रपदे
न सममन्वयधीः ततो ज्ञाकांक्षाज्ञानान्वयाद्यनुविधानादाकांक्षाज्ञानं कारणमिति उभयोरन्योन्यविरहस्थले कार्यानुदयादुभयस
हकारिता पारिशेष्यात् अन्वयविशेषणमेकस्यैवान्वयभेदेनाकांक्षामत्त्वासत्त्वलाभार्थं तात्पर्यविषयत्वविशेषणमनुभवेनिरंतरवाक्या
र्थबोधस्थले आकांक्षागमनार्थं ननु तदिदं पदं तात्पर्यमाकांक्षेति पर्यवसानादन्त्येकवाक्यताभिप्रायविषयपदोपस्थितिरेवा
कांक्षेति चेन्न। नष्टटः कर्मत्वमित्यादीनां संग्रहापत्तेः जनितान्वयबोधेऽतिव्याप्त्यापत्तेः श्वेतादिकूपत्तुना आकांक्षाज्ञानाभावापेक्ष
याऽकांक्षानिश्चयो गृह्णीति। तत्राभ्रमितज्ञानादेरप्येवमहेतुतापत्तेः किंवानाकांक्षाज्ञानाभावान्न दाहगुर्यघनाकांक्षाज्ञानप्रतिबं
धकं स्यात् नेनवाकांक्षानिश्चयस्याजनकावेऽनाकांक्षाज्ञानस्य प्रवंधकत्वं संभवति यास्त्वविरोधविषयकस्यजनकोभ्रमतज्ञान विघट
नक्षौरेव प्रतिबंधकत्वात् अन्यथातिप्रसंगादित्यन्यत्र विस्तरः ननु पूर्ययोः समभिव्याहारस्तयोर्नान्योन्याभावः यत्रवान्योन्याभावस्तत्र तयोर्नी
योन्याभिः इति कथमुक्ताकांक्षायास्त्वेसत्तोग्रहणाप्रकारमनुगतधर्ममाहनामेति। तथा च नामपदं विना विभक्तिपदमित्यादिकं मेनाभ्या
त्वेत्यर्थः ननु नीलपदं विनापि घटपदस्यानयमान्वयबोधकत्वान्नालस्यनाकांक्षास्यादित्यत आह। पदेति। तथा च तन्मते न तयोराकां

मि॰श्रा॰ क्षायेनाव्याप्तिः।किंतु नीलमानयेति घटमानयेति प्रत्येकान्वयबोधानंतरं समभिव्याहारादथ समाकृष्टः। अस्माकं तु यादृशान्व
२१ येसाकांक्षत्वं तादृशान्वयानुभवविरहः॰परस्परस्य परस्परं विना। अस्येवेति नाव्याप्तिरित्यर्थः समवस्थ्यसाधुत्वे कथयपद
साधुत्वेत्यत आह।पक्षेति।नचैवं कर्म धारये विशेषणाविभक्त्यर्थभेदे लक्षणामंतव्येति निषादस्थपतिसधिकरणाविरोधः
कर्मधारयेऽभेदस्य संसर्गमर्यादया भानाभ्युपगमादिति भावः।घटमिति।इदमपि परमतएव पदपदस्यान्वयप्रतियोग्युपस्था
पकपरतयाइष्टव्यदेवदत्तत्वे अस्मन्मते।अध्याहृतपदं नानुभावकं।सामान्यतएव वार्थोपस्थापकपदत्वेनाध्याहारात्।नहि
शक्तेपदं विशेषतोऽध्याहर्त्तुं शक्यते तथावत्तदर्थोपस्थापकपदत्वेनाध्याहृतपदं कथमनुभावकमिति मतद्वयेनोक्तं नन्वेवं प्रतीतौ
नुपपत्त्याकस्यनाक्षेपान्मात प्रवर्त्तकत्वानस्यानुमानाधीनत्वादिसफलवेराह पक्षेति।कर्त्तुरिवेत्यस्मन्मते दृष्टान्तः।सोऽपिपदाक्षेपो
नुमानं नतदावस्तुतः कर्त्तुरात्तेपापमेवयत्स्वप्रथमान्तपदोपस्थाप्यत्वमितिवक्ष्यते ननुगौणालाक्षणिकपोस्तु भवं प्रत्यसमर्थत्वेन स्प॰
तदावस्तुतः कर्त्तुरात्तेपापमेवयत्स्वप्रथमान्तपदोपस्थाप्यत्वमितिवक्ष्यते ननुगौणालाक्षणिकपोरनुभवप्रत्यसमर्थत्वेन तयोरनु २१
भावकत्वाभावो नपदांतरव्यतिरेकप्रयुक्तइति तेनाकांक्षा स्यादित्यतआह।गौणेति।आकांक्षाभावदनुभावकस्य सहकारिणो

।नवगोरगाद्यननुभावकं। येन साकांक्षताभ्युपगमेनाव्याप्तिः स्यात्। तथा च यस्यैवोपपदार्थेन गंगापदेन विना न तीराद्यन्वया
नुभावकत्वं तत्पदार्थपर्यवसानमाकांक्षेति भावः। तदुपस्थापितस्यानुभावकत्वमित्यत्र विषयत्वं षष्ठ्यर्थः। तेन तदुपस्थापित
विषयकानुभवजनकत्वमर्थो लभ्यते। अथाकांक्षैवेति परमते दृष्टान्तः। वस्तुतस्तु यत्पदोपस्थापितस्यार्थस्य यत्पदेन विना ना
न्वयबोधविषयत्वमित्यर्थो वाच्यः। कथमन्यथैकपदोपस्थाप्ययोः कृतीष्टसाधनत्वयोरन्वयबोधमेकदेशी ब्रुवाणो ह्वगान्तरेणा
प्रत्याख्यातो न त्वाकांक्षाविरहात्। तथा च गोगादेरननुभावकत्वपक्षेपि नाव्याप्तिशंकेति स्मर्तव्यं। ननु मामाख्यातादिवत्सामान्यध
र्मेणा। पदान्तराभावोप्यास्त्वः। तथा च समानविभक्तिकपदान्तराभावप्रयुक्तानुभावकत्वमनाकांक्षेपि गतमित आह। घट इति। अ
न्वयविशेषतस्य साकांक्षत्वात्। अत एव यथा कृशेत्युक्तं। ननु यदि तत्साकांक्षत्वं हि कुतो नान्वयधीरित्यत आह। अयोग्यत्वादिति। अत ए
व धर्म्यभिन्नधर्मवादिनो योग्यताभ्रमाद्भवत्येवेति भावः। ननु पदान्तराभावप्रयुक्तान्वयाननुभावकत्वाभावो गुरुः। तत्प्रयुक्तत्वापकत्वाभा
वस्य लघुत्वात्। अस्तिवत्तदिहापीत्यत आह। तत्तदिति। नवयमननुभावकत्वाभावगर्भमाकांक्षालक्षणां क्रमः। अपि तु सामान्यतो
ज्ञापकत्वाभावो विशेषपर्यवसन्न· स्मारणस्य पदान्तराभावेऽप्युपपत्तेस्तथा च कथमतिव्याप्तिरिति भावः। ननु यदि तदभावेप्याकांक्षा

सि॰ मु॰ ज्ञानादन्वयधीस्तदिहापि तथास्त्वमाह विष्यतीत्यत आह। क्रमेणेति। वाक्यं समासवाक्यं ननु पदं। प्रत्येकं पदं। समासवाके
२२ ऽपि वृत्त्युत्पत्तिरिति भावः। कश्चित्तु वाक्ये लोपवर्णनेन तत्र वाक्यार्थोऽनुभूत इति विशेषणं। धनत्वमर्थोन क्रियाकर्मभावः। तादृश्यान्वय
बोधे तेषामसामर्थ्यादिति वदंति। नन्वेवमसमर्थ्यादन्वयानुभवाभावे योग्यतासत्तिरपि हीयेत। तत्राप्यसामर्थ्यादेवान्वया
नुभवस्य सुवचत्वादित्यत आह। अनासन्नमपीति। तत्र वास्तवसामर्थ्यमिति।। अन्यथा कष्टापि तत्र फलोपधानेन स्यादिति भावः।
नन्वाकांक्षासत्त्वे प्रथमत एव कुतो नान्यपुरुषान्वयबोधः सामग्रीसत्त्वादित्यत आह। यद्वेति।। यद्विशेषणीभूताभिप्रायाभावे
न विशिष्टभावत्वपाकांक्षाविरहादिति भावः। उत्थिताकांक्षत्वात् संभवं धिकृत्वात्।। अत एवेति।। यदित्तात्पर्यवशादपि पुरुषेणाभि
न्वयबोधस्तदा जनितान्वयबोधत्वमात्रे विशेषणानुपादेयेत ननु तात्पर्यगर्भमिति भावः। वाक्येति। यथा कुलकादौ वाक्यार्थक
र्मतापवांतरवाक्यार्थबोधपूर्वक एवमहावाक्यार्थबोध इत्यर्थः।। न व्याख्यातृपरत्वरसोऽन्नाद्वनं। तदीयं तु पदं विशेषणामननुग
मेनानन्वयोपस्थितित्वेन हेतुतायां हि न च द्वितीयः कल्पो विकल्पसहः। तादृशाय किंचिदज्ञमात्र स्यादिति प्रसंगात्। तादृशायावदज्ञमत्व राम॰
संग्रहीतुमशक्यत्वात्। एवमयोग्यपानाद्येऽपि एवं प्रतियोगि कुक्षौ निक्षिप्यतदज्ञन्योपस्थितित्वेन हेतुत्वे कारणतांतरविलोपप्रसं २२

गादित्यादौ। यत्तु कैश्चिदुक्तं घटः कर्मत्वमानयनं कृतिरित्यादीनामपि नासामर्थ्यादन्वयबोधकत्वं। कथमन्यथा तादृशैरेव वा
क्यैरबाधो बाधापादिक्रमेण व्युत्पन्नस्य ततोऽर्थप्रत्ययः। न च तादृशवाक्येन परस्याप्रवर्त्तनात् व्युत्पत्त्यनुपपत्तिः। प्रयोज्यप्रयोजकयो
र्व्युत्पन्नत्वेन विभक्त्यादिस्मरणद्वारापि परंपरया वाक्यार्थबोधजननद्वारा प्रहस्तुसादात्। न च व्युत्पत्तिस्तु नाम विशेषो ज्ञातः येन साक्षा
त्तु नकत्वलक्षणा व्युत्पत्तिस्तस्य न स्यादिति। तेषां पुरुषविशेषीयवाक्यार्थबोधावसामर्थ्यात्।। व्युत्पत्तिर्वैचित्र्येण पुरुषवैचित्र्यात्क
थमन्यथा तथा व्युत्पन्नस्य घटमानयेत्यादितो वाक्यार्थानुभवः। न युक्तासामर्थ्यलक्षणाकांक्षाविरहमंतरेण तदनुभवाभावप्रयो
जकमन्यदिह गतेः व्यमाणां पश्याम इति।। अथेति।। न वा घटजातत्वेन पदार्थतावच्छेदकमिति वाच्यं। अन्वयितावच्छेदकस्यैव तदवच्छे
दकत्वादिति विवेकः।। वस्तुतस्तु पयस्त्वपदार्थतावच्छेदकमेव तदवच्छेदेन घटजातसंसर्गादर्शनादिति यथाश्रुतमेव सम्यक्। न च घ
जातसंसर्गो न पयसि अन्विताचयस्य ग्रंथकारसंमतत्वात्तथा बाधजननं न पयस्यसंसर्गोऽपि युगपदेव भासते। न च विशिष्टवैशिष्ट्यालाभः
विशेष्ये विशेषणं तत्र विशेषणान्तरमित्यादिसामग्रीतो संभवात्। एवं च पदार्थतावच्छेदकावच्छिन्ने तद्दर्शनमस्यैवेत्यरुचेराह। वाक्यार्थेत्य
ति। तथा च सर्वत्र नायं प्रकारो यागेष्टसाधनत्वादिवाक्यार्थाप्रत्ययप्रसंगात्। तदवच्छिन्ने तत्संसर्गादर्शनादिति भावः। वाक्यार्थेति न

मि.श्री.
२३

चयोग्यतायाः संशयो हेतुरिति संसर्गव्याप्यधर्मवत्त्वसंशयो वाच्यः तथा च कथमेवमिति वाच्यं व्याप्यसंशयस्य व्यापकसंशयसाम
ग्रीत्वमिति तथा सति तत्र सर्वत्र वाक्यार्थसंशयापत्तेः। न चान्यादृशयोग्यताभ्युपगमेपि तथात्वापत्तिः। उक्तसमाधित्वादिति दिक्।
योग्यतेति। योग्यताभ्रम एव शाब्दभ्रमे हेतुर्वाच्यः। अन्यस्याननुगतस्याभावात्। तथा च तदभावे तदधीनो भ्रमो न स्यादिति भावः। ननु संस
र्गाभावव्याप्यधर्मशून्यत्वमित्यस्यायमर्थो यत्संसर्गविरोध्यनधिकरणत्वं। विरोधित्वं च तदधिकरणानधिकरणत्वं तच्च केवलान्वयि
प्रकृता वाक्याद्यादौ प्रसिद्धमित्युच्यते र्णितत्र माहृगेहेति यत्र गेहे कदाचिदपि घटसंसर्गस्तत्र संसर्गाधिकरणतया गृहीतेपि गेहे घ
टोनत्यभावः सोपि संसर्गाधिकरणानधिकरणो नेति तदधिकरणाधिकरणाभ्रमस्यैवग्रहः संभवति। तथा च सप्रमतिप्रसंगः। यथा श्रु
तेनुकूलं विदपि संसर्गः तत्तत्कालीनतऊहत्वमपि संसर्गाभावव्याप्यमस्तीति न घटाभावग्रहकाले तथाभूतव्याप्याभावनिश्चय इति
ध्येयांतर्हीति। अन्याभावसत्त्वेपि पटत्वेन। वाक्यार्थाभावः स एव हेतुरिति प्रकृतसंसर्गबाधकप्रमाविरहो वाच्यः तथा सति तद्रूपाणां यथा श्रु
तेनुप्रकृतसंसर्गबाधकसामान्याभावो हेतुरिति स्फोटप्रसिद्धिर्भवतीति। ननु यदि न बाधकमानाभावः तदा बाधकत्वानापत्तिः परस्परविरो
धेहि न प्रकारान्तरस्थितिरित्यत आह। अत एवेति। न भावधीः नाप्यभावधीः उभयात्मनि विरोधाभावादिति भावः। अन्वयप्रयोजकरूपवत्त्व

राम.
२३

यदि तदोक्तदोषापत्तिरित्यन्वयस्वरूपयोग्यतावच्छेदकधर्ममेव त्वं वाच्यं तथासत्याह सेकेति। ननु एवमेवोक्तेन निश्चयोऽपेक्षणीयो
ऽपितु संदेहमात्रं तत्त्वस्वरूपयोग्यतावच्छेदकधर्ममेव त्वं वाच्यं तथा सत्याह सेकेति ननु एवमेवोक्तेन निश्चयो त्वपेक्षणीयोऽपितु सं
देहमात्रं तत्त्वस्वरूपयोग्यतावच्छेदकधर्मज्ञानादेव तत्ससमानधर्मत्वादित्यत आह।। उपजीव्येति। सावेति। बाधितस्थलेत्येकपदा
र्थसंसर्गविरहि पदार्थसंसर्गः परपदार्थनिष्ठः सेवनकारणत्वनिष्ठो योऽसत्ताभावस्तत्प्रतियोगित्वप्रमाविशेष्यत्वमेवेति तदभावो योग्य
तेत्यर्थः। न च विषयत्वाभावमात्रं सम्पकृघटसंसर्गत्वं गेहनिष्ठासत्ताभावप्रतियोगीति प्रमाविषयो घटसंसर्गो यो संभवापत्तेः। न च घ
टसंसर्गो गेहनिष्ठासत्ताभावप्रतियोगिधर्मवानिति प्रमाविशेष्यत्वं यातथाप्यसंभवापत्तेरिति वाच्यं। तत्प्रतियोगित्वमात्रप्रकारकप्रमाविशे
ष्यत्वाभावस्य विवक्षितत्वात् मात्रपदस्य चाभावविशेषणापरत्वात्। पदविशेषणत्वे चैकपदोपस्थाप्यप्रकृतोद्देश्यसाधनत्वयोरन्वयाबोधयोग्य
ताविरहे वादेवप्राप्त इति तन्निराकरणपुरस्तरानुसरणप्रयासानुपपत्तेः। लडाद्येकपदवाच्ययोर्निमानत्वादिकस्यान्वयविधयः स्वपमप्य
गीकाराच्च किं चाघक्षणावच्छेदकेऽघटो वा निसर्गवाक्ययोग्यं स्यात्। प्रागभावसत्वेऽप्यसत्ताभावाप्रतियोगित्वात्। एवं च संसृष्टत्वेऽपि। अपि
च ध्वंसयोगी सपिवाक्यमयोग्यं स्यात् तन्निष्ठास्यत्ताभावप्रतियोगित्वात्। संयोगस्यानवप्रतियोगि विरुद्धत्वेऽव्याप्यवृत्तित्वेवाऽभावविशेष

 सांतर्हि व्याप्तिवदिहापि लाघवेनान्योन्याभावप्रतियोगितावच्छेदकत्वप्रमाविशेष्यत्वाभावे हेतुतापातात् । न चेष्टापत्तिः । अत एवोक्ता
 व्याप्तिरप्यलक्ष्या भवतीति वाच्यं । तथा सत्ययपदार्थसंसर्गोऽपरपदार्थनिष्ठात्यन्ताभावप्रतियोगीति प्रमायामपि शाब्दधीप्रसंगात् । न
च व्याप्तिस्थलेऽपि साध्यात्यन्ताभाववद्वृत्तित्वज्ञानेऽप्यनुमित्यापत्तिः सत्यां व्याप्तिभ्रमविशिष्टत्वात् । अन्यथा च तदभावादेव कार्याभावात्
। न चेहापि तत्तमुवव तत्र न स्याविरोधित्वात् इदं तु ग्राह्याभावपर्यवसानेन साक्षाद्विरोधित्वात् । न त्वेवं तत्रापि साध्यसंसर्गग्रहे तत्सा
क्षाद्विरोधि किंतु करणविघटकं । किंच । प्रतियोगिसमानाधिकरणत्वं तत्समानाधिकरणत्वेनात्तत्त्वमिति तुल्यं व्याप्तौ तथा च तद्रूपस
रूपसत्त्वपात्यो व्याभावात्पत्ताभावगर्भयोर्ज्ञानव्यभागे तुल्यतया लाघवाघनवतारेणोभयोर्जनकत्वविनिगमनाविरहात् । तत्कथमेकैव पो
गपत्ता न वा विनिगमनाउभयहेतुत्वेऽपि मिलितस्यैव हेतुत्वादन्यतरोपसंग्रह उपलक्षणार्थ इति वाच्यं । अन्योन्याभाव अत्यन्ताभावो वा नाति
तिविपर्यस्यतोऽप्यत्तागर्भयोग्यताज्ञानमात्रात् शाब्दधीदर्शनेनान्योन्यव्यभिचारेण प्रत्येकहेतुत्वपक्षस्यैवाच्यत्वात् । तस्य चाननुगमेनासं
भवात् । किंचोक्तैकपदवृत्तैकपदार्थेऽपरपदार्थनिष्ठात्यन्ताभावाप्रतियोगिसंसर्गाभाववत्त्वप्रमाविशेष्यत्वाभावादिकं कुतो न योग्यता तुल्य
मापत्तात् तस्मादुक्तरूपा अभावा अननुगता एव प्रत्येकं योग्यताः । ग्रन्थस्तूपलक्षणपरः । तासां च ज्ञानं न कारणं येन मिलितधीहेतुत्वे अ

संभवः प्रत्येकहेतुत्वेननुगमः किंतु तावद्योग्यताविरहात् ज्ञानमननुगतमपि मिलितं हेतुः विषयबाधाबाधाभ्यां प्रामाण्याप्रमाण्येति ॥
तत्र ब्रूमः । तात्पर्यविषयीभूतसंसर्गतदाश्रयत्वाभिमतपदार्थनिष्ठधर्मविशेषवत्त्वप्रमाविशेष्यत्वाभावो योग्यता तथा च तात्पर्यविषयी
भूते विशिष्टवैशिष्ट्यसंसर्गे तादृशयोग्यताभावाद्यपि विशिष्टेति नातिव्याप्तिः । एवं तात्पर्ये संसर्गाभावस्यापि संसर्गे विशेष्ये वेति न तद
संसर्गाभावग्रहे एतादृशयोग्यताज्ञानं संभवतीति नातिव्याप्तिः स्यात् । एवं द्रव्यं संयोगी तत्रापि सामानाधिकरण्यमात्रेऽविरोध इति योग्य
त्वे विशिष्टवैशिष्ट्ये तु विरोध एवेति न योग्यताया स्मिन् ज्ञाते तत्र ज्ञानेनैतस्यैव विरोधित्वात् । वस्तुतस्तु पदार्थसंसर्गतात्पर्यविषयीभूते तत्तदा
श्रयत्वाभिमतापरपदार्थनिष्ठधर्मविशेषत्वप्रमाविशेष्यत्वाभावः एतादृशसंसर्गतादृशनिष्ठाभावप्रतियोगितावच्छेदकत्वप्र
माविशेष्यत्वाभावस्तादृशसंसर्गतादृशपदार्थनिष्ठप्रतियोग्यसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वप्रमाविशेष्यत्वाभाव
स्तादृशः । एकपदार्थेऽपरपदार्थनिष्ठाभावप्रतियोगिसंसर्गाभाववत्त्वप्रमाविशेष्यत्वाभावः स्वमादिः प्रत्येकमेव योग्यता प्रत्येकज्ञान
देव शाब्दान्वयबोधः इति न च मिलितज्ञानानां हेतुत्वमसंभवि प्रत्येकहेतुत्वेऽननुगम इति वाच्यं । ग्रास्त्वसंसर्गविरोधिविरहज्ञानत्वेनानु
गमात् । ग्रास्त्वसंसर्गविरोधित्वं च तज्ज्ञानप्रतिबंधकज्ञानविषयत्वं तत्तद्वै अनन्वयनिश्चयस्य प्रतिबंधकस्य सर्वत्राभावादिति । अथ

मि०कु०
२५

थात्वेनतावद्धेतुत्वेनोक्तदूपयोग्यताज्ञानं हेतुत्वायतदुपयवस्यानस्याकिंचित्कारतापत्तेः नच व्याप्तिज्ञानानामपि साध्याभावसामाना
धिकरणप्रधीविरोधिसामानाधिकरण्यज्ञानत्वेन हेतुत्वापत्तिः इष्टत्वात् न चाव्याप्त्याभावगर्भत्वेनेति विरोधः अन्योन्याधिकरत्वेना
त्वव्यवच्छेदपरत्वादिनोपपादितत्वात् नच गौरवेणातावज्ज्ञानापेक्षयातावद्विरहज्ञानाभावहेतुत्वेवोचितालाघवाद्दावश्यकत्वाच्चेति
वाच्यं प्रमाप्रमयोर्विचित्रकारणत्वेनाभावात् अन्यथाव्यभिचारज्ञानविरहसहकृतसहचारज्ञानस्यैवतद्धेतोरितिमायेनानुमितिहेतुता
पत्तेः नच विषयसत्वादेव प्रमातदभावादेवाप्रमेतिवाच्यं विषयस्य प्रत्यक्षमात्रहेतुत्वात् अतीतादिनाव्यभिचारात् अन्यथानुमिताव
प्युक्तप्रकारापत्तेः नापि विषयाभावस्य भ्रमहेतुत्वम् सघटस्तदातीगंधवानित्यत्रातीतप्रागभावावच्छेदेनगंधप्रतीतेर्भ्रमत्वापातात् तत्र वि
षयबाधस्य प्रागभावरूपस्यातीतस्याजनकत्वात् अनुत्पत्तेः नत एव प्रत्यक्षभ्रमेपि दोषान्तरकारणमनुमतमिति सर्वमुक्तं तावद्योग्यता
ज्ञानानां तावद्व्याप्तिज्ञानानां च प्रत्येकमेव शाब्दविशेषेऽनुमितिविशेषे च जनकत्वं कार्याननुगमस्यादोषत्वात् ॥ शाब्दबोधसामान्येऽनुमिति राम०
सामान्ये च यद्ज्ञानमात्रे पक्षज्ञानमात्रं च कारणम् ॥ नचातिप्रसंगः विशेषसामग्रीं विना सामान्यसामग्र्या अकिंचित्करत्वादित्यपि २५
वदंति नचैवं घटो नेत्यादौ इति प्रत्यक्षेप्युक्तयोग्यताज्ञानादन्वयबोधापत्तिः यत्तावज्ज्ञानकूटस्य प्रतिबंधकतया तावज्ज्ञानाभावकूट

ड्गमकमित्युक्तत्वान्नैवंभावव्यक्तत्वाकूटमात्रं कारणं अप्रमाप्रमावैचित्र्यनियामकं तदभावस्योक्तत्वात् । न केवलं शब्दे रीतिरियम्
लिंगपरामर्शजानुमितिभ्रमत्वनिर्वाहायोक्तरूपयोग्यताभ्रमज्ञानस्याबाधितत्वज्ञानरूपत्वेनानुमितिहेतुत्वस्योक्तत्वात् ॥ कश्चि
त्तु घटाभावग्रह एव संसर्गाभावग्रहं विना न भवतीति यत्संसर्गावच्छिन्नो योऽभावस्तत्संसर्गाभावग्रहे नियतः स इति गेहे न घट इति
ज्ञाने सति उक्तरूपयोग्यताज्ञानासंभव इति वदन्ति । पूर्वोक्तो मध्यामिनु वदति प्रमेयमिति । नन्विदमसंगतं तथा हि । यद्घटत्वपर यदर्थ
तावच्छेदकावच्छिन्ननिष्ठाभावप्रतियोगित्वप्रमाविशेष्यत्वमाकाशादाववृत्तेः सुलभप्रसिद्धं तथाप्युक्तरूपयोग्यताज्ञाता प्रयोजिका वा
च्या । न चावृत्तावनुपस्थिते तादृशयोग्यताज्ञानसंभवतीति तत्तादृशायां प्रमेयं वाच्यमिति धीर्न स्यादिति परस्य तत्किं विसदार्थतावच्छे
दकाश्रयप्रमायोग्यताभ्रमसंगोत्वे प्रसिद्धः कोन चेदृशीयोग्यतासंभवति । यद्यपि सिद्धचैत्रीयकयपदार्थसंसर्गस्य पक्षे कि विशिष्टासं
ताभावप्रतियोगित्वनियमेन तादृशप्रमाविशेष्यत्वाभावतानासंभवात् । मैवं । पृक्कि विसदार्थविशेषनिष्ठासंता भावप्रतियोगित्व
प्रमाविशेष्यत्वाभावस्तत्पदार्थविशेषस्य योग्यत्वेन तत्र ग्रहस्यापि भावात् पक्षे कि विसपदार्थनिष्ठासंता भावप्रतियोगित्वप्रमाविशेष्यत्वाभावः
संसर्गत्वावच्छिन्नसंग्रहसंभवादिति भावः । नन्विदं प्रमागर्भत्वेन गुरुत्वं देयं चेत्तत्राह । वक्तेत्यादि । तात्पर्यं मद्योक्तरीत्या कथितप्राय

मि॰श॰ २६ नचोक्ताभावप्रतियोगित्वमेवयोग्यतास्तुकिमवच्छेदकपदेनेतिवाच्यं।असंभवात्नहिवाक्यार्थसूयःसंसर्गविशेषःप्राग्व
र्त्तिः नचायंपदार्थविशेषः अपितुसंसर्गत्वावच्छेदेनसंसर्गः।पदार्थत्वावच्छेदेनपदार्थः।तथाचसर्वस्याःसंसर्गव्यक्तेःप्रत्येकं
प्रत्येकपदार्थनिष्ठाभावप्रतियोगित्वेनसंसर्गत्वावच्छिन्नोपरपदार्थत्वावच्छिन्ननिष्ठत्वंताभावप्रतियोगीतिप्रतीत्यसंभवः नचै
वमुक्तयोग्यतायामपितत्संसर्गस्यतथात्वेनतत्संसर्गत्वस्यप्रतियोगितावच्छेदकतयासंसर्गत्वावच्छिन्नेतथाभूतावच्छेदकाभा
वप्रत्ययानुपपत्तिरितिवाच्यं।संसर्गत्वेतादृशप्रतियोगितावच्छेदकत्वाभावस्यविवक्षितत्वात्।एवमुक्तरूपयोग्यतायामपिनिर्वाच्य
मितिसंक्षेपः।नचस्तुयोग्यताहेतुः।अपितुसामान्यसामग्रीत्वेनविशेषसामग्रीचप्रमाजनकतावच्छेदिकातद्बहिर्भावेनसांशेक
मेनन्वितिप्रमाणतायांप्रमाफलोपधानमित्यर्थः।आसत्तिश्चेतिनन्वेवमनासन्नमासत्तिभ्रमेणान्वयबोधविषयोनस्यात्।तत्रोपस्थि
तिस्वीकारेभ्रमस्यैवासत्तितापत्तेः।अव्यवहितपदार्थोपस्थितिंविनाविशेषणज्ञानाभावेनविशिष्टबुद्ध्यनुदयादासत्तिभ्रमाणान्व
यबोधेतदावश्यकत्वाच्चे।नैवंतद्धेतुघटकदाव्यवहितोपस्थितिरासत्तिरितिविवक्षितं।व्यवहितोक्तपदाव्यवहितत्वभ्रमस्यैवा राम॰ २६
सत्तितयासत्तिभ्रमस्थलस्याभावात्।नवापस्थापकपदाव्यवधानंसा।अतएववस्तुतोव्यवहितमव्यवहितत्वेनविपर्यस्यतोति

वाच्यं मौनिश्लोकादौ पदाभावेनासत्त्वापत्तेः अत एवोच्चारणाव्यवधानं सेति निरस्तं न च तदुपस्थापकस्य पदस्य तदर्थे स्वाव्यवहि
तोपस्थापनं तदुपस्थित्यनुकूलो व्यापार इति यावत् स च क्वचिदुच्चारणात् क्वचिल्लिप्यादिना एवं च तत्तद्व्यापारं विना पदस्तदर्थयोरनुपस्थितेः
पुस्तके चैत्रेण । अनेन वक्त्रे समव्यवहितोच्चरितं अनेनाव्यवहितं लिखितमिति भ्रमे सत्यव्यवहितोपस्थितपदापेक्षयान्वयबोधापत्ति
र्वाच्यं । एवं हि योजनादिना श्लोकादावन्वयबोधो न स्यात् वक्त्राव्यवहितोच्चरितमिति ज्ञाने ऽव्यवहितोपस्थित्यनुकूलव्यापारत्वापत्तिज्ञा
नाभावात् । विशेषदर्शनात् । किं चैकपदानन्तरमित्यव्यवधानप्रतियोगिवक्ष्यं वाच्यं तथा चैकपदोपस्थाप्ययोरन्वयेनाधिगम्यत्वा । अस
त्वभावात् । न चेष्टापत्तिः क्रमेण साधनत्वयोरन्वयबोधस्यानेन दोषेणादूषितत्वादर्थतत्त्वज्ञानविदां स्वीकारात् । मैवं । तदर्थोपस्थित्यनुकू
लव्यापारस्य विवक्षितत्वात् । न चातिप्रसङ्गः एकपदानन्तरं अपरपदस्य प्रत्यक्षस्यैव तद्व्यापारत्वात् तस्य च लिप्यनुमित्यादिना लाभात् ।
अत एव श्लोकादौ योजनानन्तरं तात्पर्यैकस्वान्तो ताद्विशेषबोधाय योजनं पातन्तात्पर्यफलमापनात् । न च श्रुतकवाक्यादवासत्त्वभावः उप
स्थापकव्यापारस्यैव तथाविधत्वात् तत्त्वान्वयथात्तात्पर्यतो वा उच्चारणातो वा तिष्ठत्विति किंचित्स्य न उपमापिनाशकनीयः सा
मान्यतोऽर्थोपस्थित्यनुकूलव्यापारत्वेन जनकत्वात् न च तत्तात्पर्यमप्यव्यवधानेनोच्चारणाम् अन्याव्यवधानेऽपि तत्र तत्काण्डतीरितिवाच्यं । तत्र

मि॰ग्र॰ २८

हितात्पर्यमन्यत्र तत्र सतोप्युच्चारणास्यापि किंचित्करत्वेनान्वयबोधानुकूलाव्यवहितोपस्थित्यननुकूलत्वात् । अन्वयबोधानुकू
लोपस्थित्यनुकूलस्य च विवक्षितत्वात् । तत्र विपरीततात्पर्ये सैव ग्रयादिति दिक् । अव्यवधानं चान्वयविरोधिव्यवधानाभावः । नवान्वय
योग्यपदार्थान्तरेऽव्यवहितेन तथा तेनैव महान्वयधर्मनेवेन प्रकृतान्वयाविरोधित्वात् । यत्र च नानाविशेषणाकपदोच्चारणानन्तरं तो
द्वेतेपि विशेष्येनान्वयबोधः तत्र तत्तत्केविशेषणाव्यवहितेपि विशेषणान्तरे तयोरन्योन्यान्वयासंभवेन व्यवधानेपि तदन्वयविरोधित्वा
भावेन नाव्याप्तिरिति ध्येयं वस्तुतोऽव्यवहितत्वेन पदस्तत्पर्यमासत्तिः । पर्यवसितेति भुक्तवाक्यपि नाव्याप्तिशंकाप्राचेति । न चैवमासत्याश्रयाना
न्याश्रय इति वाच्यं । उक्तरूपसन्नानतत्ज्ञानत्तज्ञाने चानुभवगर्भोक्तरूपासत्तिरिति भावात् । एतेन यथाश्रुते विवक्षितेनपद्यपि नान्यो न्याश्रयत्वं ।
अन्ययानुभवानुकूलव्यापारस्तानानंतरमन्वयानुभवोत्पादादिति । किं त्वव्यवहितत्वविशेषणानुपपत्तिः युगपदेव सर्वपदार्थे वैशिष्ट्यानु
भवात् तत्स्मारणे चेतानि समूहरूपान्वयबोधतात्पर्यकारणेत्येवमाकारकस्मृतस्य वगतार्थ इति दृष्टप्रत्येकेति यथा नवपदस्मरणे तथा प्रत्ये
कपदानुभवपूर्वकतावत्पदस्मरणाः इति मतमेवेन दृष्टान्तः । तथापीति । तत्तद्वाक्यार्थबोधस्यानष्टत्वात् तावत्पदार्थगोचरस्मृतिरेव महा
वाक्यार्थबोधे हेतुरित्येवागतिः तत्स्यामथानुपपत्तिरित्यर्थ इति संप्रदायः । वस्तुतस्तु तावत्साकाङ्क्षयोग्यासन्नतावत्सार्थकबोधितान्तरवाक्या

राम॰ २८

र्थबोधः। तथापि नानाविशेषणकैकपदार्थान्वयितवाक्यार्थबोधे तु नैवगतिः समूहालंबनस्मृतेरेवगतिः। अनन्यगतिकत्वात्
।विशेषणानामन्योन्यमनाकांक्षत्वेऽप्येकपदत्वे च तस्य स्वसमान्वयबोधाभावेन तत्तत्सकलविशेषणसाकांक्षयोग्यविशेष्यमात्रान्वयि
तयातावद्विशेषणविशेष्योभयगोचरसमूहालंबनस्यावश्यकत्वादित्यर्थ इति क्रमः ॥ अत एवाक्षेपेण नानाविशेषणके सुक्तं।
अन्यथावत्तदनंतभोक्ष्येपलम्भकतायां तद्धयन्यासवैयर्थ्यात्॥ अन्यथानेकवाक्यार्थबोधस्थले तन्मूलकवान्तरवाक्यार्थस्म
स्यैवोपपत्तेस्तावत्रोचरस्मृतावनन्यगतिकत्वोपन्यासविरोधात्॥ तस्मादिदंपर्यवसितं नानाविशेषणकविशेष्यबोधे प्रागपन्नावदन्व
यबोधान्तरोधात्समूहालंबनस्मृतिनियमः। न चैकविशेषणविशिष्टविशेष्यतत्राऽपि विशेषणान्तरधीरिति वाच्यम्। एकत्रैव धर्मिण्येवं
प्रकारकाचयधीतात्पर्यकवाक्ये तथाप्यप्रतीकारात्। वाक्यार्थकर्मके कुलकादौ तदंशे कांक्षादिमत्त्वके मापादे। अतः संभवन्महो
वाक्यार्थज्ञाने ग्रंथादौ वावान्तरवाक्यार्थबोधनियमात् समूहालंबनस्य संभावनियमः। न हि कुलकादावित्तुवाचे स्यादौ इत्यादि
पदोपस्थाप्यस्य वाक्यार्थस्यानुपस्थितावन्वयबोधः। न च तदुपस्थितिरवान्तरवाक्यार्थबोधं विनाऽऽद्यादिसर्वनाम्नः पूर्वोपस्थितपरा
मर्षकत्वात्। तस्य च प्रकारान्तरोपस्थितौ पूर्ववाक्यवैयर्थ्यं एवं सर्वत्राग्रिमानित्यन्वयबोधे कुतस्त्याकांक्षायास्त्वभावे कुतो हेत्वन्वय

मि॰ग्र॰ धीः।अतस्तत्रवाक्यार्थयोग्यमेवाकांक्षा॥नहिवह्निबोधमात्रेतदन्वयः।एवंपदाध्याहारेप्येकमहावाक्यार्थबोधेप्यवान्तरवाक्यार्थबोधानभ्युपग
२८ मेऽध्ययनानुपपत्तिः।नत्वनेनतावदेकदैवज्ञप्यतेकिंतुदिनेदिनेकिंचित्। अतएवसमग्रबोधनासमर्थस्वल्पमुच्चार्ययोजनयाबोध्यते।अ
त्रघटमानयेत्यादौत्वनियमः।सामग्र्याद्वयस्यएकस्यावश्यकतायामेकत्रसामग्र्यनिर्णयेनतदुभयानियमात्।एवंचयवावयवाद्विवाक्यादर्थ
सर्वत्रानन्वितसर्वान्वययक्षोग्रन्थकृतामभिमतइति।भ्रमस्यपक्षेव्यवस्थितिसर्वंसुस्थम्।अन्येतुयावद्भिर्वक्तुर्वचनाविच्छेदस्तावद्भिरेकैकैर्वाना न्वि
तमवधीः।विच्छिन्नेत्ववान्तरवाक्यार्थबोधपूर्वकोन्वयबोधः।अतएवालोकार्थविच्छिन्नेऽपराह्णेन्तिपदार्थेनान्वयेलोकाइतिवदन्ति।अत्रपद
गमायामासत्तौ॥संस्कारेति।नानास्मरणोप्यन्ततरसहभावकल्पनान्यायात्एकोद्वाविवत्तत्रलेकशब्देनकमेकरेविभक्त्याम्पदेकत्वमुपस्था
पितम्।अनयनोबोधेएकस्यैवकेवलस्यान्वयः।तथाद्वावित्यत्रापीतिद्रष्टव्यम्।वस्तुतःस्मरणामकिंचित्करं।अनावश्यकंचपिधेहिपदद्वारान्वयबोधानु
कूलस्मारकपदार्थसमभिव्याहारवदितिवाद्वारोपस्थापकपदसमभिव्याहारवदितिवासामान्यतोऽनुमितिः।विशेषानुमापकलिङ्गाभावादितित्वे
।देवदत्तस्यपतिनन्वत्रहृदयोगेषष्ठ्यवाधवादिका।अन्यथातत्तोयाअप्रसक्तोनिमन्त्रप्राप्यनानुपपत्तेरितिमेव।हृदयोगपिहिषष्ठीनकर्तृक रामः
त्वप्रकारावबोधयतिकिंतुसंबंधत्वेनसंबंधश्चकर्तृत्वमेवसमदेतत्।तथाचकर्तृत्वेख्यातलिधानेकर्तृत्वप्रकारकान्वयबोधार्थतृतीयानियम २८

प्रकृतेपि तथा स्यादिति भावः। अत एव ग्रंथकृता तात्पर्ये इति। एतादृशतात्पर्यमेव नत्वन्विता तात्पर्यकत्तथाप्रयोगे वा।
साधुत्वमिति साक्षेपार्थः। तुल्यं प्रकृतेपि विशेष्यत्वेनान्वयेतात्पर्यतादृशान्वयेयेवत्तो याने साधुत्वमित्यर्थः। न त्विति। यावत्तदुपस्था
पकेत्यर्थः। तेन यावदन्वयप्रतियोगिपदोपस्थापकपदत्वेन न हेतुतो गौरवादित्यर्थो लभ्यते। तस्मात्किं पाकास्येति। न च युक्तमे
तत्। पदविशेषजन्यत्वस्याप्रयोजकत्वात् पदविशेषोत्स्थान्वयाविरोधी वाच्यः। तदपेक्षयाऽन्वयविरोधजन्यत्वस्य लघुत्वात्। प
दत्तर्भावे गौरवात्। एवमपि परस्तुते। साधुत्वापपदाध्याहार इति। तत्र एवमपि पदाध्याहारात् नियमानुस्वयमेव साधुत्वज्ञानस्या
हेतुत्वमित्यभिधानात्। अपभ्रंशात्मकपदघटितवाक्यात्स्वार्थान्वयानुभवाभावापातात्। किंच परस्मात्तनास्यपवेत्साभिप्रायि
कमुच्चेयं। न च वक्तुरभिप्रायविषये नियमतः पदमस्ति। न च श्रोतुस्तदभावनिश्चयाभावे न तदभिप्रायविषयानुमितिरभा
सरूपेव पदज्ञानमात्रस्यैव प्रयोजकत्वादिति वाच्यं। मीमांसकेनापि धेहीति निगदितेऽश्रोतुर्नैयायिकादेराभिप्रायिकपदभाव
निश्चयवतोऽध्याहाराभावेनान्वयबोधानुपपत्तेः। न च मुकोदीरितेपि धेहीति वाक्येऽध्याहारपक्षेपि भसंगतिरिति वाच्यं॥
आभोक्तत्वनिश्चयं विनाऽध्याहारलक्षणायोरकल्प्यत्वेन प्रापत्तेः। अपि च यत्र यदानन्तरं विनापि साधुत्वं यथा वृद्ध इति विशेष्यपदे त

मि॰ श॰ त्रविशेषणापदाध्याहारोनस्यात्तथावत्तत्रविशेष्यपदोपस्थितिमात्रेणान्वयबोधोपपत्तेः नचसमानविभक्तिकविशे
२९ षणापदंविनाविशेष्यपदेऽभेदान्वयबोधेनसाधितिवाच्यं। इष्टस्वर्गयोरभेदान्वयबोधस्यविधेयवक्ष्यमाणत्वेनव्यभिचारादि
ति। अत्रब्रूमः। पदैर्विशेषणानन्वयाविरोधित्वात्एककारणापरिशेषापत्तेः। अन्वयविरोधितावच्छेदकाप्रतीतावन्वयविरोधि
त्वाप्रतीतेश्च। नवान्वयबोधजनकतावच्छेदकभूम्यत्वादरूपत्वविरोधित्वनामतस्माद्विभक्त्यादिसमभिव्याहृतपदत्वमेवविशेषः
नन्वनुदन्तुभाववृत्तिविभक्त्यादिसमभिव्याहृतमेवेतिचेत्। न। विभक्त्यादिसमभिव्याहृतपदत्वेनहेतुत्वेपस्थापितान्वितशक्त्युप
स्थाप्यस्वार्थानुभवजनकत्वात्। अन्यथातात्पर्यमात्रादेवनिर्वाहेवृत्तिकल्पनाक्वापिनस्यात् तात्पर्यस्यावश्यकत्वात्। किंचवृ
त्त्यनुपस्थाप्यस्यापिशाब्दान्वयबोधविषयत्वेपदितदाकाशादिपदानांशक्तिकल्पनानस्यात्। समवायसंबंधेनस्वार्थोपस्थापनेवृ
त्तपदेऽस्वान्वयबोधसंभवात् यदप्युक्तंमीमांसकेनस्यादितिदपिमंदं। उक्तयुक्त्यापदस्यैवान्वयबोधोपयोग्युपस्थितिहेतुत्वे राम॰
नान्वयबोधानुकूलोपस्थापकत्वेनसामान्यतोपिवक्तुरभिप्रायस्यपदविषयत्वात्। विशिष्टाभिप्रायाविषयत्वेपिसामान्यतस्त २९
थाभावात्। नचपदत्वेनतथात्वभावनिश्चयकथनेमितिवाच्यं। समानप्रकारकविरोधिज्ञानस्यैवप्रतिबंधकत्वात्यदज्ञमोपस्थि

तिरेवानतियामिकेतिनिश्चयेऽपिवक्तृतात्पर्यस्याग्रहे च तथाभावेनान्वयबोधानुकूलत्वेन तदभिप्रायविषयत्वात्। नन्वेवं नैयायिको
क्तेऽपि धेहीतिपदेऽन्यथाप्युपस्थितिरन्वयबोधाङ्गमिति निश्चिन्वतो मीमांसकस्य परश्वाहरणाभावेऽन्वयबोधो न स्यादिति चेत्। न।
इद्रापि धेहिपदे इतरान्वयबोधानुकूलसमभिव्याहारवदिच्छाकारिकया अनुमितेः स्वपदविषयत्वात् परम्परस्योक्तयुक्त्या। तथाभा
वात्। पदत्वेन ज्ञानस्य किंचित्करत्वादिति तदर्थज्ञापकत्वज्ञानस्यैव वर्णालोपाद्यनुरोधेनार्थोपस्थापकत्वात्। तथाभावात्। पदत्वेन ज्ञान
स्य किंचित्करत्वादिति तदर्थज्ञापकत्वज्ञानस्यैव वर्णलोपाद्यनुरोधेनार्थोपस्थापकत्वात्। तदर्थमेवाप्यत्र पदज्ञानानुसरणात्। नचोक्त
प्रकारेणापदज्ञानेऽपि न शक्तिधीरिति वाच्यं। ज्ञानेतरापि स्वान्वयप्रयोजकत्वेन ज्ञानं तत्त्वेन नत्वीश्वरज्ञानत्वेनेति वक्ष्यते॥ तथा च प्रकृतेऽपि नका
र्यान्वयपर्यवसितिरिति दिक्॥ वस्तुतः शक्तिरपि चैतावता न पदज्ञानमेव पदार्थस्मरणव्यापारकमनुभावकं। न तु शक्तिधीरपि भेदात्तेनोपस्था
थोपस्थापिकान्वयानुभाविका वेत्यग्रेवक्ष्यते इत्येवं रमणीयं। एवंकारेण। परकार्यमिति पदपदार्थालोचनया नाकनिराकरोतीति नेति
पदार्थेति। तथा च घटादिपदघटादिपरमित्यव्यवहारापत्तिरिति भावः। भूतार्थस्येति परिणतिविषयमिसादिवाक्यस्यापि तदुद्वेति। तस्तु भ
वेत्यर्थः। अग्रेतन तत्प्रतिपादकत्वं प्रतिपत्ति सामान्यपरमिति नयोनारूढ्वमित्यविरोधः। ननु तत्प्रतिपादकत्वं तत्प्रतिपादनानुकूलवक्तृस्या

मि॰श॰ पारविषयत्वं। ननु तत्प्रतिपत्तिजनकत्वमात्रं। अत एव न प्रतिपादकत्वमुक्तं। नैवं मन्यो न्याश्रयावकाशाऽसावरसात्तेषां तरमाह।
३० प्रशंसेति। तथा च प्रवृत्तिपरं वाक्यमिति व्यवहारविरोध इति भावः॥ लाक्षणिकस्येति। गंगापदेन प्रस्मरणात्तेन च तीरस्मरणान्नतु
तीरप्रतिपत्त्यनुकूलो गंगायाः संबंध इति तत्राव्याप्तिरिति भावः॥ ननु नोक्तक्रमेण तीरस्मृतिः तस्याः पदार्थत्वे विभक्त्यर्थान्वयस्य वक्ष्य
माणत्वात्। तथा च लाक्षणिकस्य लक्ष्यप्रतिपत्त्यनुकूलस्वार्थाविनाभावस्य संबंध इत्याशंकते थेति। ननु तत्समयावच्छिन्नः पुरुषस्तथा
प्य एवेत्यरुचेर्दोषान्तरमाह। गंगेति। मुख्ये वाचकत्वे उपलक्षणाः स्वार्थाविनाभूतत्वेऽपि गंपत्व इति चेद् दृष्टव्यं तेन मत्स्यादिप्रसंगो वारितो भव
ति अन्यथा परिहारस्य नत्तापत्तेरिति। ननु प्रतिपत्त्यनुकूलसंबंधवत्त्वसामान्यमतत्तात्पर्य। स च संबंधो द्विधा शक्तिर्मुख्यार्थबाधे स्वार्थाविना
भावश्चेति कथं तत्तहीत्यादि। अतो दोषान्तरमाह न स्यादिति। प्रयुक्तः पर प्रतिपत्तिविषयीकृतः ननु जनितः मौनिश्लोकाद्याप्तिभयात्। ननु व
क्तुरिच्छाप्रत्ययवोधप्युपात्ततो भयोरेकदानुभवसंकलनात्तादिति सिद्धांतो भज्यते तत्राह आहार्याणेति। सकृदुच्चरितस्य सकृदर्थसाधक
त्वेऽप्युत्पत्तिनिश्चयविशेषदर्शनादेकदाऽनेकार्थप्रत्ययेन बहुक्तौ। उभयानुभावनेच्छामात्रस्य तत्वमिकानुभवात्मामेव निर्वाह इत्याह नित्यवक्तु राम॰
त्यते। तथैव मुसलैः एकदोच्चारणाएकमात्रानुभवजनकत्वकल्पनात्॥ अत एव यथैकोच्चारणाएवनानार्थानुभवदर्शनेन तत्तैकोच्चारणान ३०

नाथोनुभवजननव्युत्पत्तिनिश्चयादेकैवेत्यवानाथोनुभवोनावृत्तिःकरोकत्वादितिशक्तात्तृतीयाविभक्त्यादेरुद्योर्व्यद्
मसोभयवाचिपुष्पवंतादिपदेष्वाएतन्नाएवंस्फुटव्युत्पत्तिवैचित्र्याणामेकदैकत्रोभयार्थप्रत्ययनात्।नचोभयानुभावापेक्षाऽपे
क्षतएवाकांक्षयदितदैकदैवेत्यवश्यमभिप्रायःश्रोतृत्वेवाक्यभेदावश्यकत्वादितिवाच्यं।पूर्वोक्तविशेषदर्शनेयुगपदनुभवे
च्छायाकवाक्यान्तर्भावेणतात्पर्येच्छायाश्चविरहादितिभावः॥एकवेत्युच्चारो॥एकस्मिन्वाक्येनन्विदंयुगपदिमावर्थावनुभा
वयत्वितिवक्तुरिच्छायामावृत्तिकल्पकमेवनास्तीतियुगपदुभयानुभवःश्रवणसामग्रीकतयाभ्यासापिदुरपवादःइदंवा
क्यमिमावर्थौबोधयत्वितितात्पर्येपितथा।आवृत्तौवाक्यभेदात्।नचोक्तविशेषदर्शनादेतादृशीवक्तुरिच्छासंभाविततेति॥प्रत्रा
दिनाशेशोकादेस्पष्टवादिदिदृदर्शनेनबाधितेपीच्छासंभवाच्चविशेषदर्शनस्यासार्वत्रिकत्वाच्च॥वस्तुतस्तुविशेषदर्शनमेवन
एकोच्चारणेएकानुभवजनकत्वदर्शनात्एकानुभावकत्वंतेनैकानुभावकत्वमात्रात्तत्कल्पकाभावात्।गौरवाच्चाकस्यचिन्न
थाव्युत्पत्तावपिनसकृदुच्चरितादिसर्वनियमःअन्यत्रतथाभावात्।एवंचेदृशप्रयुक्तव्युत्पत्तिरेवनेतादृशीतदावक्तुरिच्छायांयो
गपद्यप्रवेशेपीमावार्थौविदेवाक्योच्चारणावाधयत्वितिकेमाकमाम्पतरागर्भगजेभिप्रायमात्रेपिनावृत्तिकल्पनं।ठक्काभिप्राय

स्थल इव युगपदुभयसामग्रीसमावेशादिति मनसि सन्नाह । अत्रेति । एकवाक्यतानिर्वाहायोगपद्यान्निर्वाहाय
रिविशेषदर्शनाद्यभिप्रायः । तदा मास्तु युगपदुद्भवः । न हि तस्मात्प्रात एकोच्चारणान्निर्वाहस्तु स्यादेव भूमि छायादि नियमश्च कथ
त्वात् । तदर्थनिर्वाहोपि वक्त्रभिप्राया स्वीकारेण तदाहन्निरपि मानस्यादिति भावः । नन्वाहृत्तिकल्पकता सर्वमिति संपरस्तु युगप
देनेकार्थानुभवसामग्र्येव न पदस्यैकदैकानुभवजनकत्वस्वभावत्वादित्यत आह । अत एवेति । यत एव न शब्दस्वभावोऽपि तु तास
र्यं यह मात्रापेक्षं सत एव पुष्पवन्नापि परस्तूभयपरेणाहन्निरिति भावः । ननु सामग्र्यौ तौल्यमेवानएकमात्राचभवजनकत्वस्वभावत्वात् ।
न च पुष्पवन्तादिपदे व्यभिचारः । शुस सिद्धेर्विकिरणाविशेषादित्यत आह । प्रथममिति । तस्मादिति निर्गमकाभावादुभयोर्ज्ञानं युगप
ज्ञानं वा स्यात् । न त्वावृत्तिरिति न स्वभावसिद्धिरिति भावः । अर्थेति । अशक्तेः सिद्धसाधनं वा गाायविवादपदमिति । एकमात्रानुभावक
त्वे बाधो ज्ञानसादीनामपि तदनुभवविषयत्वादित्येकशक्तिविषयमिति विशेषणात् नैकशक्तिविषयस्यैकस्यैवानुभावकत्वं लभ्यते ।
एकशक्तिविषयत्वावच्छिन्नस्यैकत्वेन विवक्षितत्वात् । एकपदोच्चारणात् एकोच्चारणान्निर्विना नार्थशक्त्यैकपदोच्चारणात्
ता तेन विभक्त्यादिपदेन व्यभिचारः । नन्वेकमात्रानुभावकत्वमननुभावके उभयपरत्वात् बाधितमिसत्यत आह । येनेति । स्वकीयम

त्वंपतरविषयाननुभावकत्वंसाध्यं यथाश्रुतेऽपरपदार्थेऽन्वितत्वाथानुभावकत्वाद्याधापत्तेः। अतएवपदत्वादिस्वच्छन्दादिघटेव्यभिचार
त्रानार्थत्वादितिहेतुकृतः तदर्थंस्फुत्तेलानार्थान्यनानार्थत्वादिति। निरुपाधेर्बाधानवकाशादाह सामग्रीति। ननुपदघटिताकृतिविशे
लेएकैवान्वयधीतत्वेकवाक्यतापत्तिः ज्ञानभेदेनवाक्यभेदादित्यतआह वाक्येति। अर्थैकत्वेएकवाक्यतालक्षणत्वादितिभावः
।।ग।।ति। ननुशक्यपौरेकाग्रनुभवेपिशक्यलक्ष्ययोः कथमेवं। अन्नयपपत्तिधीविलंवेनलक्ष्योपस्थितेर्विलंबितत्वादिति।। मैवं।
शक्योपस्थितौतदन्वयानुपपत्तौलक्ष्यतात्पर्यग्रहकालेशक्येपितात्पर्यग्रहसंभवात्। घोषमत्स्यादिवितिसमुदितघ्यऽन्वयानुपपत्ते
भयोःक्रमयधीसंभवाच्च। नन्वेवंसकृदुच्चरितात्संक्षेपान्वयानुभवद्वयमपिनियमोभज्येत नचान्वयाननुभावकत्वाभावगर्भाकांक्षेतिजनितानु
भवेआकांक्षाविरहात्तदनुभवानामितिवाच्यंतात्पर्यविषयाननुभावकत्वाभावगर्भायाकांक्षायास्तत्रापिभावादिति। मैवं।। सामग्रीसत्वेऽनु
त्पत्तेः। अन्यथातदभावादेवतदभावइतिदिक्। एवंप्रथमोद्धारः शाब्दपर्यवसितत्वमिदमेवयदनुभवान्तरजननेकालेस्वतःप्र
तौ वा विसामग्रीकत्वंननुजनितान्वयबोधतात्पर्यानिराकांक्षत्वं। उभयोःसात्पर्यविषयत्वेएकानुभवसिद्धयथाकांक्षासत्वात्। एक
देशशक्तिमैसमुदायशक्तेः एकज्ञानमिदमुभयाभिधानमितिदिक्। पर्थेति स्वभावदृष्टान्तः। ननुस्वतंत्रतदिच्छयोच्चरितत्वंतत्सत्वंकथ

मि॰श॰ मध्यापकतात्पर्यनिर्वाहनमित्यत आह।तदिति॥लाघवादितिभावः॥मीमांसापदं वेदकथं।तदवधारणमित्यत आह।अनादी
३२ ति।ननूच्चारणानादित्वदृष्टान्तेन तात्पर्यानादित्वं त्वयोच्यते तदेव नास्तीत्याशंकते।अथेति।तथा चोच्चारणासादित्वेऽर्थसिद्धमेव
तात्पर्यसादित्वमितिभावः।अनुगतेतिपक्षतावच्छेदकापीचेपकिसमानाधिकरणसाध्यसिद्धेरितिभावः।पूर्णापंचमो वेदइस
न्यत्रापि वेदप्रयोगादर्शनतः सिद्धसाधनं मा भूदित्यत आह।मुख्येति।मुख्यार्थेति।अनुगतप्रवृत्तिनिमित्ताना नेमुख्यामुख्यविभा
वनुपपत्तेरित्यर्थः।ननु माध्यंदिनादिशाखासमुदायः स्वपक्षस्तत्र इत्यत आह।समुदायस्येति॥स्वर्गेति।शब्दतनुपजीविप्रमाणा
तिरिक्तप्रमाणाजन्यप्रमितिसविषयार्थकत्वमित्यर्थः।अन्यथादिशब्दार्थानिर्वचनादितिभावः।हीति॥शब्दतनुपजीविप्रमाणातिरि
क्तप्रमाणाजन्यप्रमितिविषयार्थकत्वमित्यर्थः॥अन्यथादिशब्दार्थानिर्वचनादितिभावः।तर्हीति॥पक्षतावच्छेदकमानानन्तरमनुमा
नावतारादितिभावः।विवादो विप्रतिपत्तिः।ननूक्तधर्मावच्छेदेनैव विवादपदत्वमास्तामित्यत आह।भारतेति।तथा च तत्राप्येवं विवादा
पत्तेः अनतिप्रसक्तस्यैवावच्छेदकत्वादितिभावः।ननु भारतादावपि विवादसंभवादित्यर्थः।तथासति प्रकृतेऽसंभावात्।असतः सिद्ध राम॰
साधनस्य विवादादेवाभावात्।विवादाभावे तत्साधारणपक्षत्वाभावादिति साध्यविकल्पमुपपादयितुं पृच्छति किंचेति।नापीति।साधु ३२

धारणाविषयत्वं नेत्यर्थः। ननु सादित्वं न प्रागभावप्रतियोगित्वं अपि तु सजातीयध्वंसाव्याप्यप्रागभावप्रतियोगित्वमित्याशंक्य निषेधति।
मापीति। प्रथमेनेति। तथा च तत्रैवानैकांतिकमिति भावः। तज्जातीय इति। तज्जातीयत्वं साध्यमित्यर्थः। तर्हीति। स्वतंत्रप्रणीतं यन्नु-
त्तिधर्म्मवत्त्वं इति ध्रुवकेदं न स्वतंत्रप्रणीतमित्युक्तं भवति। स्वतंत्रेणाव्यपदेशः प्राथम्येनेति न्यायादिति व्यासस्य न ममेति व्यपदेशो न स्यादि-
ति भावः। ननु तेन स्वातंत्र्यमपि तु सजातीयोच्चारणानपेक्षोच्चरितजातीयत्वं साध्यं पदीयं तादृशमुच्चारणं तेनैव व्यपदेश इति नियामकमित्य-
त आह। स्वातंत्र्यं वेति। तत्कालावच्छिन्नोच्चारणानपेक्षत्वं ममापि तदुच्चारणकालावच्छिन्नानपेक्षत्वेन व्यासस्याप्यन्नर्ते तदर्थं न सजातीयत्व-
अपि त्वनुपूर्वीविशेष इत्यरुचेर्दोषांतरमाह किंचेति तदेति। आद्यभारतादिपूर्ववर्त्तिनस्तादृशस्याभावात्। निष्ठार्थं स्वच्चमत्वादित्यर्थः। अ-
थेति। वेदस्यातीयं पक्षः स्वतंत्रोक्तत्वं साध्यं तत्र स्वतंत्रपुरुषप्रणीतत्वमित्यर्थः। शब्देति। शब्दं तदुपजीवि च शब्दजन्यवाक्यार्थज्ञानोपजीवति
यावत् ताभ्यां प्रमाणाभ्यामतिरिक्तं यत्प्रमाणांतरं न्यूनप्रमित्यविषयार्थकत्वे सतीत्यर्थः। तेन प्रत्यक्षशब्दोपजीव्यनुमानादिविषयलौकिकेश-
हेतिः। न च प्रथमप्रमाणपदं वैयर्थ्यं प्रमाणपार्थं यद्वा जन्यवाक्यार्थज्ञानमुपजीवतीत्यर्थेला भार्थं तदुपादानात्। अन्यथा शब्दजन्यप्रहेत्वादि-
मूलकारिष्टत्वादि तच्चक्षुरादिविषयविषयकलौकिकवाक्यातिव्याप्तेरशक्यपरिहारत्वात् साक्षात्परम्पराधारणापेक्षामात्रशरीरत्वादुपजीवि-

मि॰प्र॰शा॰ नाथाः॥ नच शब्दोपि यमाणां प्रामाण्यार्थकं विषद्धमपेक्षते किं तु स्वनिर्वाहार्थे अपेक्षते तु वेदेऽप्युपजीविप्रमाणं प्रामाण्यार्थमपि वेदं॥ अत्रो
३३ पजीवितायां वाक्यार्थज्ञानपर्यन्तधावनप्रत्यक्षेण चैत्रशब्दश्रुत्वा चैत्रः शब्दायत इत्यादिप्रयुक्तवाक्यातिव्याप्तिवारणाय। तस्य शब्दप्रत्यक्ष
मूलकप्रमाणमात्रगम्यार्थत्वात्। ननु तज्जन्यवाक्यार्थज्ञानोपजीविप्रमाणविषयार्थकत्वं अत एव शब्दपदमप्यपार्थं वा॥ अन्यथा
शब्दस्यापि प्रमाणस्य शब्दगोचरज्ञानोपजीवित्वेन शब्दोपजीवितया तत्र लक्षणगमनानुपपत्तेः॥ न चैवमपि अतिव्याप्तिः चैत्रवाक्याद
यमर्थो ज्ञात इत्यादिवाक्यानां चैत्रशब्दजन्यवाक्यार्थज्ञानं विनाऽसंभवादिति वाच्यं॥ चैत्रशब्दजन्यवाक्यार्थज्ञानाभावेऽपि वाक्यार्थज्ञानमा
त्रेण तादृशवाक्यसिद्ध्या तदनुपजीवित्वात्। पक्षे शब्दोपजीविता समानविषयकशब्दजन्यज्ञानसापेक्षत्वात्। अत एव नचक्षुरादावतिप्रस
गः॥ एवमपि प्रमाणपदं तदर्थमेव। न हि स्वर्गयागादिजन्मोऽन्याजन्यत्वे सति जन्यत्वादिरूपादिलिंगस्य सत्तायामेव शब्दमुपजीवति अपि तु
प्रमाजनने। न चैवं योगजप्रत्यक्षविषयत्वादेरर्थस्यासंभवः। तस्य योगविधुपदेशकशब्दोपजीवित्वेपि समानविषयकशब्दानुपजीवित्वा राम॰
दिति वाच्यं। अग्रिमप्रमाणपदेनैव तद्वारणात्। न हि योगिप्रत्यक्षे शब्दतत्समानविषयशब्दोपजीविप्रमामति। किंतु प्रमाणं जनकमास्त्रिपा ३३
गजवर्मस्य प्रमाणव्यापारतया प्रमाणत्वात्। मनस्य च साधारणत्वात्। शब्दतदुपजीविप्रमाणातिरिक्तमनोजन्यत्वे छद्दडख्यादिभिरसंभ

वचारणायासाधारणधर्मेणात्मादिव्यावर्त्तनायवाग्रिमअप्रमाणपदस्यासाधारणज्ञानकरणपरत्वात् । न च योगिप्रत्यक्षस्थले योगजध
र्मोन्यस्यासाधारणमस्ति । अत एवाग्रिमप्रमितिपदमप्यर्थवत् । शब्दादुपजीव्यप्रमाणातिरिक्तासाधारणकरणजन्यवेदार्थ
गोचरस्मृतिविषयार्थकत्वेनासंभववारकत्वात् विशिष्टज्ञानादेः स्मृतिकरणस्य प्रमाणत्वाभावेन विशिष्टातिरिक्तत्वात् स्मृतेश्च न
प्रमितिरननुभवत्वात् अनुभवपरत्वेप्रमितिपदस्य एवज्ञानलक्षणायामपि प्रसंगो वारितः तत्र ज्ञानस्य प्रत्यासत्तित्वात् । भ
नसश्चासाधारणत्वात्त्रे वेदार्थगोचराया वेदोपजीवित्वाच्च सामान्यलक्षणानुयद्यपि बहिरिन्द्रियप्रत्यासत्तिरूपेत र्हि स्वजन्यज्ञानसमान
प्रकारकत्वेन प्रमितिर्विशेष्यान हि प्रमेयत्वादिनातज्जन्याधीर्वेदजन्यप्रमितिसमानप्रकारिका न च स्वांशावच्छिन्नत्वप्रकारिका सा वेदा
नुपजीविप्रमाणजन्याऽसाधारणकरणजन्याबाधमनोमात्रकरणजन्यत्वात् । न च वेदव्याख्यानेभगवद्भक्तेरतिव्याप्तिः वेदाः
केनचिद्व्याख्याताः महाजनपरिगृहीतत्वात् इत्यादीनां तदुभयातिरिक्तप्रमाणत्वात् । अर्थपदस्यतात्पर्यविषयपरतया व्याख्यानस वे
दतदर्थबोधबोधकभावतात्पर्यकत्वात् । नैवं वेदार्थस्य तद्गोचरत्वादसंभवः स्वसमानप्रकारकत्वेनैव वारणात् । न हि वेदतद्व्याख्या
नयोस्तुल्यप्रकारकधीजनकत्वसंभवो ऽभेदापत्तेः । अत एव संकेतग्राहकेभगवद्वाक्येनातिप्रसंगः तदर्थस्य तदुभयलिङ्गप्रमाण

मि॰ श॰
३५

गोचरत्वात् । न वायुर्वेदादौ दृष्टार्थैः व्याप्तिः तस्य परमतेऽवेदत्वेन तदुभयसिद्धादृष्टार्थकमात्रस्य पक्षत्वात् । एतावद्वेदसमानविषयकस्मृ
त्यादेर्गतमत आह शब्देति शब्दजन्यज्ञानाजन्येति कृते अश्रुनिकवेदव्याप्तिरिति वाक्यार्थपरोपादाने । न च सा तथापीति वाच्यं । । वाक्यार्थज्ञा
नस्याहेतुत्वात् । । तद्विनापि सजातीयप्रवृत्त्या तादृशवेदजननात् । न चैवं शब्दपदत्यागे जन्यवाक्यार्थज्ञानाजन्यत्वे वैयर्थ्यं तत्र स्वजन्यत्वे सत्यतिवि
शेषणावैयर्थ्यात् तन्मतेन्यावर्त्याप्रसिद्धेः अजन्यज्ञानासिद्धिदशायां प्रथमजन्यज्ञानाजन्यत्वस्य दुर्ग्रहत्वात् एज लक्षकपोतकस्य पक्षत्वानुमा
नाख्याजन्यज्ञानसिद्धेः न च वेदसमानार्थकस्तु कर्मोक्तेस्तुकवाक्येऽतिव्याप्तिः स्वविजातीयशब्दजन्यवाक्यार्थज्ञानामूलकविवक्षायां वाक्यार्थप
दवैयर्थ्यादिति वाच्यं । प्रमाणशब्दत्वेनैव वारणात् । तस्य महाजनपरिगृहीतार्थकत्वात् । अप्रमाणशब्दव्यावृत्तेः सतां तेनैव भावात् । अप्रमाणश
ब्दस्यानर्थकत्वात् महाजनपरिग्रहश्चादृष्टार्थकाध्ययनयोग्यत्वमिति न काप्यनुपपत्तिः । नैवं सायंतनपदवैयर्थ्यं दृष्टार्थकगाणादिव्यावर्त्तक
त्वात् न चैवाध्यायोऽध्येतव्य इति विधिविरोधः अध्ययनकर्मत्वघटितत्वाद्वेदत्वस्येति वाच्यं । एतस्योभयमतसिद्धत्वेन पक्षतावच्छेदकत्वात् । स्व
रूपत्वदृष्टार्थकस्य वाक्यस्य स्मार्तनित्यानुष्ठापकत्वादिपरोक्षान्तदवच्छेदेन वाध्ययनविधेः … सत्संतत्स्य … साधारणापि प्रागुक्तं वा
स्मीयं तत्र वाराणाच शब्दजन्यवाक्यार्थज्ञानाजन्यत्वप्रयुक्तप्रामाण्यवत्त्वया तेन वेदस्य प्रामाण्यमीश्वरप्रसक्तमूलकत्वेन शब्दान्तरस्य विजाती

राम॰
३५

यानुपूर्वीकस्य प्रामाण्यं शब्दजन्यवाक्यार्थज्ञानजन्यत्वेन तथा च शब्दजन्यवाक्यार्थज्ञानजन्यत्वप्रयुक्तप्रामाण्यवत्त्वावच्छेदकं तद्विजातीय
तदर्थकपदत्वं तदन्यत्वं विवक्षितं शब्दपदं च तादृशवाक्यान्तर्भूतपरं । तेनैकदेशस्यापि वेदत्वापत्तावपि दरध्ययनबाधो लभ्यते । अत एव चत्वारो
वेदा अजायन्त इति संगच्छते । अन्यथा समुदायवृत्तित्वे वेदत्वस्य तद्विरोध इति सर्वं सुस्थम् ॥ सजातीयेति । समानजातीयानुपूर्वीकशब्दो वा रागा
न पक्षो वा रागाद्विषयजातीयत्वमित्यर्थः ॥ आद्येति । निष्ठार्थस्याविवक्षितत्वादिति भावः । ननु तज्जातीयत्वं तद्वृत्तिधर्मवत्त्वमिति धर्मान्तरेणासिद्ध
साधनमिति शङ्कया धर्मपक्षकमेवानुमानमाह ॥ अथ चेति । प्रमाणेति । महाजनपरिग्रहत्वावच्छेदकेत्यर्थः ॥ महाजनपरिग्रहश्च ग्रहणा
धारणानुष्ठानादिरित्यर्थो । न च रितयागादिवृत्तियागत्वादेर्व्यभिचारो भ्रमादिति वाक्यधर्मत्वविशेषणं ॥ तावन्मात्रं चेदनीतं न वेदत्वादावनेका
न्तिकमित्यभयमुपात्तमिति भावः । तेन प्रमाणतावच्छेदकत्वं यदि प्रमाणमात्रवृत्तित्वं तदा इदानीं तन वेदत्वे व्यभिचारोपत्तिरिव छिन्ति धीजनक
त्वं तदा योग्यवाक्यत्वे व्यभिचारः प्रमाणशब्दत्वमेव वेदत्वमिति । तस्यैव तदनवच्छेदकत्वात् असिद्धिश्चेति दूषणमलग्नकं वेदितव्यम् ॥ ॥ ननु तेषा
मपक्षत्वे तत्र संदिग्धानैकान्तिकत्वं परमते स्यात्तस्य हेतुमत्तिसाध्याभावसंदेहोपि दूषक इति प्रकारान्तरमाह तादृशेति ॥ नेदृशा विभाषिकमित्याह
तथापीति । गुर्विति स्वरूपकथनं । अध्ययनपूर्वकत्वमात्रादेवेष्टसिद्धेरित्यवधेयं । ननु स्वयंभुवेण भगवानित्यादिवाक्ये वेदस्य नित्यतां प्रतिपा

मि॰ शु॰ इयत्त्वावच्छेदकत्वादित्यत आह। स्वयमेवेति॥ अथा ओ३ हुवीरयेहु जायीति इति प्रत्यक्षश्रुतिविरोधेन सर्वो ओ३ ढुंवरोवेषीपित्वेति स्मृतेर्य
३५ थाश्रुतार्थबाधः कल्प्यते॥ स्मृतेर्मूलभूतश्रुतिसापेक्षप्रामाण्यायाः प्रत्यक्षवेदविरोधेन मूलानुमानं तवेदानुमानात् यथाश्रुतेश्च प्रामाण्यनि
र्णयात् तथेहापीति भावः। नित्येति। नित्यतया निर्दोषत्वेनैव प्रामाण्योपपत्तेरिति निर्दोषत्वत्वहेतुतया नित्यत्वं वोद्धव्यं। नन्वप्रामाण्यहेतुत्वे
न लौकिकवाक्याव्याप्तेः तथा हीति॥ वर्णात्मकस्येशतः सिद्धसाधनवारणाय। समवेतत्वे सतीति। समवाये सति स्वार्थः। तेन समवायस्य
संबंधसामानाधिकरण्येऽपि तन्निमित्तत्वं लभ्यते अन्यथा समवायप्रतियोगित्वसामानाधिकरण्यपर्यं प्रतियोगित्वविशेषणावैयर्थ्यापत्तेः। न चास्मन्म
ते शब्दत्वादिसमवायवत्तया शब्दे हेतुसत्त्वेऽपि परमते कथं हेतुसिद्धिरिति वाच्यं॥ सादृश्यादीनां तन्मते तत्र समवायानुत्पत्तिरश्चत्र स्वसमानका
लीनपदार्थप्रतियोगिकध्वंसानाधारसमयमात्रं निर्वाच्यं। अन्यथा तादृशसमयसंबंधहेतुत्वलाभेऽपार्थविशेष्यत्वात्। वस्तुतस्तादृशसमय
संबंधपरमेवोत्पन्नेत्यपदं समवाये सत्युत्पन्नेरित्येव हेतुः कथायां प्रमादिसेव प्रयोजकं समनुपयोग्यर्थत्वादिति प्रागेव व्यवस्थापनात्। ननूत्पन्नत्वेन
स्वसमानकालपदार्थप्रतियोगिकध्वंसानाधारसमयसंबंधित्ववर्णमात्रयत्नोच्चारणोच्चारणमशब्दभागासिद्धिसंदेहादिति प्रागभावप्रतियोगित्वेवा रम॰
च्यं। तत्रैकदेशिनः समाधानमाहुः क्वचिन्निषेधतीति त्विय इत्यादि। साधयेति। तन्न इति वर्णमात्रस्यानुपूर्वीत्वेन दीर्घादीनेत्सादरविरोधप्रसंगादिति भावः॥ पदत्वा ३५
नेति॥ मौनिश्लोकानुरोधादिति भावः। तदुपनीतेति। न च तदुपनयस्थले तत्क्षणिकत्वं वर्णा एव न स्थिरत्वजातिविशेष्याभावे कुतः श्रोत्रविनि एवी

रितिवाच्यं। वीचीतरंगन्यायेननानावर्णोत्पन्नावर्णांतरेपूर्ववर्णोच्छटितत्संबंधेनविशेषण। ज्ञानोत्पन्नास्मर्य्यमाणानुपूर्वीविशेषण।
कविशिष्टधीसामग्र्यावातथासंभवादितिभावः॥ तारत्वमंदत्वेति। नचान्यूनानतिरिक्तवृत्तिजातिद्वयस्यासंभवात्रेयंशंका। तारत्वमंदत्वयो
रभेदात्। तद्वृत्तिधर्म्मयोर्भेदादित्यग्रेवक्ष्यमाणत्वात् एकप्रतियोगिकंतारत्वंतत्प्रतियोगिकंचमंदत्वंविरुद्धयदेवत्वेकप्रतियोगिकतारत्वेतदे
वापरप्रतियोगिकंमंदत्वंइत्यग्रेवाच्यमितिभावः॥ अन्नमष्टेति॥ नवानन्यथासिद्धत्वप्रमात्वंतथाचप्रमानूपप्रसक्षेणेत्यर्थः तथाचविनिगम
नाभावात्। प्रमाप्रत्यभिज्ञानयोर्वैपरीत्यमेवनकुतइतिवाच्यं। उभयत्राप्रामाण्यकल्पनापेक्षयाप्रत्यभिज्ञामात्रस्याप्रामाण्यकल्प
नालघवस्यैवविनिगमकत्वादितिभावः। स्पर्शाग्रहइति। स्वव्यंजकगुणमात्रपुरस्कारेणेंद्रियग्रहेनेरितिभावः॥ अवायवीयत्वेनेति॥
अवायवीयत्वेहिरिंद्रियत्वेनेत्यर्थः। तेनमनसिनव्यभिचारइतिभावः॥ वायुमात्रेति। सन्नादिग्राहकत्वाद्व्यभिचारःस्यादितिभाव। यदेत्या
दानमितिभावः। वायुधर्माःवायुमात्रधर्माइत्यर्थः। अन्यथासत्तादावनैकांतिकत्वादितिभावः। नश्रवणेति। नश्रवणमात्रग्राह्यधर्म्मइत्यर्थः।
तेननवायोर्वायोर्द्रव्यत्वादिजातिमत्त्वादितिभावः। ननुतारत्वादिकंजातिविशेषस्तस्यशब्दवृत्तित्वेपिवायुवैजात्यसमावश्यकमितिलाघवात्तदे
वास्तु। ननुशब्देपिवैजात्यांतरमतएवबाधकाद्दस्यारोपइत्यरुचेर्दूषणांतरमाहप्रथमइति॥ स्मर्य्यमाणारोपेहिसादृश्यविशिष्टधर्मि
धीजनितारोपस्यस्थितिर्हेतुरितिप्रथमंचाकचिक्यादिविशिष्टशुक्तिधीमात्रंननुरजतत्वविशिष्टधीर्यथातथेहापिस्यादितिभावः।

मि॰ प्र॰ सजातीयेति॥ स्वाश्रयसजातीयेत्यर्थः। अत्र च सुखादिसाक्षात्कारप्रतिबंधकतया सजातीयपदं गुणत्वव्याप्यजातिमज्जातीयत्वविव
३६ क्षितत्वात्॥ प्रतिबंधकत्वमात्रे च कृते फलोपधानप्रसंगो दुःखानुभवशान्ते दृशादृष्टगत्वमारोपितारशाद्वस्याप्रतिबंधकतयात् तदाचारणोपनुग
तमतिर्नर्लभ्येतेति तदवच्छेदकत्वमुक्तं॥ तस्यैव दुःखस्योत्तेजकस्याप्रतिबंधकीभूतस्यापि प्रतिबंधतावच्छेदकत्वात्। अनुपहि
तफलस्यापि योग्यत्वात्॥ शब्दहेति पदं रसादिसाधारणानुगतमतिप्रसंगवारणाय दुःखाभिदर्शीमादायमंदपिमाप्त्यनुगतमातिरिति जा
तिग्रहणमिति भावः। वाच्याभिमतत्वात्। वायुसंबंधात्प्रतिबंधकसंबंधस्यैवाभिमतत्वात्॥ सत्त्वेति प्रौढिवादमात्रं। नानात्वेप्यनुगततारखाप्रस
यप्रसंगस्यानुद्धारादिति मनसि कृत्वा प्रथमकल्पमेवोपसंहरति। तस्मादिति॥ उत्कर्षेति उत्कर्षत्वापकर्षत्वापरजातिमत्त्वादित्यर्थः॥
सजातीयेति॥ तादृशसाक्षात्कारप्रतिबंधकतावच्छेदकतादृशसाक्षात्कारप्रतिबध्यतावच्छेदकाश्रयजातिमत्त्वादित्यर्थः। अत्र च सामान्य
पदमनुगमकधर्मप्रविष्टमित्युपात्तं॥ वस्तुतस्तु तादृशदुःखादिमति मदृशदृष्टिसाध्यसत्त्वाद्व्यभिचारवारकतया हेतावप्रवेशनीयमेवेस
वधारणीयं। साधनेति पक्षाश्रितेज्ञानादौ साध्याव्यापकत्वात् साधने स्वादिविशेषणानचवज्ञानादौ तथा साध्यज्ञानादेरपि साक्षात्कारप्रतिबंध रम॰
कत्वात्। स्वादेस्तथात्वेपि विजातीयमात्रप्रति तथाभावात् न तु सजातीयेपि। मदृष्टे गुणत्वं च मदृष्टेऽवृत्तित्वमात्रं न तु गुणत्वात् भोगेऽपि व्यर्थ वि ३६

शेषशालादिति। अथ साध्यव्यापकमुपाधिमाह। श्रोत्रग्राह्येति। उत्पत्तिमतः श्रोत्रग्राह्याभावस्यत्वात्। न चाग्राह्योपि न सर्वः श्रोत्रग्राह्य इति वा
च्यं। व्यापकव्यभिचारस्यादोषत्वात्। अनेन द्रव्यावयवीयत्वमतः पक्षोपाधिः। अतो न व्यभिचारः। द्रव्यादेरपि व्यावर्त्तनाय न पक्षेतरत्वं। केचित्तु
अश्रोत्रत्वमुपाधिरिति पाठं कल्पयंति ध्वंसो साध्याव्यापकतया प्रागभावादिक इति ध्येयं।। ग्राहकेत्युपलक्षणं। कालमेग त्स्यत एव तौ श्रायत्विर
पि द्रष्टव्या। न च समन्येपि किंचिद्देशावच्छेदेनैव याच्य। अन्यदासमवायिनोपि तद्देशत्वसंभवात्।। किं चेति। प्रतियोगिसत्वप्रसंजितप्रतियोगि
कत्वमनुपलंभस्य न तद्विरोधित्वमित्यर्थः। एतच्च प्रत्यक्षपरिछेदे विषयचिंतने तत्रैवानुसंधेयमिति न प्रतायते।। अत एवेति।। सद्भावग्राहिकाभ्यां
न तु ज्ञायमानाभ्यामिति तत्राप्तीतिति तदुपष्टंभः। तत्वादिति। उक्तरूपाविरत्वोपि यावत्तदुपलंभकसमवधानं नियतः।। न हि किंचित्कारणासत्वेपि
कार्योत्पादो यतो येन केनापि ग्राहकेनोपलंभापादनं संभवति।। न चाश्रयनाशानंतरसंयोगध्वंसप्रत्यक्षस्थले व्यभिचारात्त्रैयं सामग्री
ति वाच्यं। व्याप्यपदेनैव वारणात्। तथा हि। व्याप्यत्वं न देत्किंकवारणीयसंद्रियसन्निकर्षादेरवारणात् घटेंद्रियसन्निकर्षाग्राह्य घटाभावग्र
हणं व्यभिचारादिति कालिकं वाच्यं भवति हि यदा घटेंद्रियसन्निकर्षः तदा घट इति व्याप्तेर्वृत्र्व्याप्यः सन्निकर्ष इति तदिता सामग्र्यामे
वघटाभावप्रत्यक्षोत्पत्तिः। नैवमपि समं उभसंध्वंसोपलंभप्रागभावस्य घटाव्याप्यस्य ध्वंसोपलंभमात्रहेतोः सम्बधाने विनेव घटाभावप्रत्य

मि॰ मु॰ ३७ क्षोत्पत्तिरित्यसाधारणोपलंभकपरम्पराप्यायं तथा च प्रतियोगितदसाधारणेतरयावत्तदुपलंभकसमवधाने सत्यनुपलब्धिर्योग्या
नुपलब्धिः पर्यवसन्ना। न चैवं स्फुटालक्तसंयोगाभावप्रसक्तेर्व्यभिचार इति। संयोगिनः संयोगप्रत्यक्षासाधारणकारणत्वादिति भावः। वायु
स्पर्शेति। यद्यपि वायुध्वंसे स्पर्शवत्त्वमुचितं। तथापि वायुप्रत्यक्षतायां विप्रतिपन्नं त्वगिंद्रियोपनीतस्पर्शध्वंसमुभयमतानुरोधादुक्तं। न
प्रतिनियतेति। न परस्परव्यभिचारिप्रमाप्रकप्रमापकप्रमाण्यादुरित्यर्थः। तेन क्षित्वाश्रमजनने स्वेन परिमाणग्राहिणा परिमाणाश्रमजनकेने
वैकत्वग्राहिणा च न व्यभिचारः। एकावच्छेदेनेति देशकालसाधारणं। अतो नैकाधिकरणाकर्मिकांगादिभिर्व्यभिचारः तेषां भिन्नसमयाव
च्छेदेन हेतुत्वेः। न चैवमत्रावच्छेदकत्वे समानदेशत्वं व्यर्थं। येन चरणावच्छिन्नशरीरात्मप्रतियोगिकाभावांशे पनसंयोगाभावमन्यामाविषय
कप्रमिति विषयाभावमनेकांतवारकत्वात्। रूपसमादौ व्यतिचारवारणाय समानेन्द्रियेति। प्रतिनियतेन्द्रियग्राह्यत्वादित्यर्थः। न च विशिष्टा
भावस्यातीन्द्रियेपि सत्वाद्व्यभिचारः। तादृशसाक्षात्कारविषयत्वस्यैव साध्यतयातीन्द्रियसाध्याभावाभावादिति भावः। यत एतादृशसाध्य
विवक्षितं अत एव नीलावलाकेसादौ न व्यभिचार इत्याह। अत एवेति। ननु मिथ इति विशेषणप्रक्षेपोपष्टंभकतयाग्रंथोपमवतारणी रा॰ म॰
यः मिथः पदद्वानेप्युक्तविवक्षाविरहे तत्र व्यभिचारवारणादिति। आश्रयेणेति। आश्रयग्राहकेन्द्रियग्राह्यत्वादित्यर्थः। व्योमेकेति। ३७

ननु व्योममात्रवृत्तिगुणत्वं पर्यवसितो हेतुः तत्र च गुणांशो व्यर्थश्चानन्वयांशे सानवच्छिन्नसत्तावत्त्वानि सत्त्वं साध्यं तत्र च साध्ये व्योमनि दृष्टवि शेषपदार्थे व्यभिचार इति गुणग्रहणमिति वाच्यं मीमांसकानां सत्ताविशेषयोरनभ्युपगमेन तत्साध्ये तद्विष्टव्यभिचारवारकविशेष णोपादानेनौचित्यादिति। मैवं। व्योममात्रवृत्तित्वं यदि व्योमेतरावृत्तित्वे सति व्योमवृत्तित्वं तदा व्यर्थविशेष्यत्वमिति व्योमेतरावृत्तित्वमात्रमर्थः तावन्मात्रं च समवाये व्यभिचारि तेन गुणत्वविशेषणमिति भावः। अत्र यद्यपि मीमांसकानामन्वयव्यतिरेकिण एवानुमानत्वाद्व्यतिरेकोपास नावश्यकत्वे व्योमत्वजातेरभावेन शब्दाश्रयत्वस्यैव तत्त्वे व्यतिरेकव्याप्तिमर्थविशेषणात्तया तुर्ग्रहा। यत्र नित्यताभावस्तत्र च शब्दत्वाभाव इति व्या प्तिग्रहसंभवात्। न च तथासत्यसाधारण्यमिति वाच्यम्। एवमपि तद्वारकविशेषणोपादानानौचित्यात्। व्याप्तिग्रहाणौपयिकत्वात्। अ साधारण्यं हि सत्प्रतिपक्षतया दूषकत्वेनागृहीतव्याप्तिके निर्वहति। असाधारणवारकविशेषणस्य व्यर्थत्वात्। तथापीयं च न पक्षय त्रे हेतुतासिद्ध्यै व्यतिरेकोपासनासार्वत्रिकी न तु व्यतिरेकव्याप्तिग्रहोऽपि सार्वत्रिक इति व्यर्थविशेषणात्तया व्यतिरेकव्याप्यग्रहेऽपि शब्दा अ न्येतरावृत्तिगुणत्वे हेतौ विपक्षावृत्तित्वमक्षतमेव। अत एव शरीराजन्यत्वहेतौ कर्तृकत्वसाधकत्वात्तत्सिद्धान्त इत्युक्तमीश्वरवादे। वस्तुतस्तु। असाधारणोऽपि हेत्वाभासेन सत्प्रतिपक्षोत्थापकत्वमपि तु व्याप्त्यनिश्चय इत्युक्तं हेत्वाभासे। तथा चासाधारणवारकविशेषणसार्थकम

मि०श्रा०

३८

वक्ष्याप्तिग्रहोपयिकत्वादिति ध्येयम। हेतुतावच्छेदकावच्छिन्नहेतूपस्थितिमर्थविशेषणतानविज्ञं। नचशब्दाश्रयपस्थितिस्तद्गुणत्वाभावोय
स्थितौ तदवच्छिन्नशब्दत्वाभावेपि समानेति परमार्थः शब्दत्ववदिसम्मते। तन्मते षड्विधेवेघःलः शब्दसमवायादृष्टान्तः। उभयसिद्धदृष्टा
न्तत्वं तत्रैनतु दृष्टान्तस्योभयसिद्धिरितिभावः। यद्यपि श्रोत्रग्राह्यत्वं श्रोत्रजन्यज्ञानगोचरत्वं त्रिपुटीप्रत्यक्षवादिमते श्रोत्रजन्यज्ञानएवा
नैकान्तिकं तथापि श्रोत्रजन्यज्ञानजनकश्रोत्रसन्निकर्षाश्रयत्वादिस्तद्वतासर्थम्। नचाग्रेतनश्रोत्रपदवैयर्थ्यं उपनीतस्पर्शा
देरपि श्रोत्रप्रत्यक्षविषयतया विशेषणत्वेन ज्ञानलक्षणाप्रत्यासत्त्यासामग्र्यसानिसेतया व्यभिचारवारकत्वात्॥ विशेषणासन्निवेशेपि
विशिष्टधीहेतुत्वात्। नचतज्ज्ञानं श्रोत्रस्यप्रत्यासत्तिः किंतु मनसः संयुक्तसमवेतविशेषणतातत्भावादित्यत्र विस्तरः। विशेषेति। शब्देतर
विशेषगुणासमानाधिकरणेत्यर्थः। तेनवायुस्पर्शेन व्यभिचारः। यद्यपि शब्देतरेत्यंश्यं तथापि परेषामसिद्धिवारकस्यापि सार्थकत
यादृष्टं। एकवृत्तिपदं मनोदिक्संयोगादावनैकान्तिकतावारणाय। गुणपदं मनःकर्मणि व्यभिचारवारणाय। नचतद्वेगे तथा
सस्यापि व्यभिचार इति वाच्यं। निरंतरगतिसंतानस्यैव तन्मते वेगत्वादिति भावः। पृथिवीति। पाकजरूपादावनैकान्तिकवारणाय पृथिवीत रा०म०
रेतिमूर्तविशेषणामिस्यदंजत्वावयविरूपादौ तद्वारणाय। भूतपदं ज्ञानादावनैकान्तिकवारणाय। संयोगादौ तद्वारणाय विशेषगु ३८

णापन्नमितिभावः। अत्रबहिरिंद्रियग्राह्यविशेषगुणावत्त्वमन्तत्वमिति यथाश्रुते व्यर्थविशेषणात्वापनित्यसमवेतत्वबहिरिंद्रियग्राह्यविशे
षगुणत्वादिस्यत्वेहेतौ तात्पर्यं। अत्याकाशेति। स्पर्शवन्मात्रवृत्तिसंयोगासमवायिकारणकत्वाभावेसतिनिःसमवेतसमवेतैकमात्रवृत्तिगु
णत्वादिसर्थस्तेननाभिसंयोगजशब्दविशेषभागासिद्धिः। ज्ञानादेःपरमाणुकर्मणिपरमाणुसंयोगेचोनयथाश्रुतमादायव्यभि
चारइतिभावः। अत्यासङ्गेति। संयोगादौव्यभिचारवारणाय समवेतज्ञानादौव्यभिचारवारणायपानात्मेति। घटादिरूपादौतदर्थंविभ्विति।
गुणायेद्यसंपातायातम। यथोक्तविभुसमवेतत्वस्यैवसमर्थत्वादिसर्वधेयं। ननुशुकप्रभवत्वंवर्णानानुमीयतेप्रत्यभिज्ञानतोनित्य
तयानिर्णीतवर्णेशुकसारिकाप्रभवत्वरूपवैलक्षण्यप्रतीतेर्भ्रमत्वात्। तथाचशुकप्रभवत्वंनिसादिस्यैववर्णस्यवैलक्षण्यपत्तद्यद्य
निगतत्वेजात्यनिबंधनशुकप्रभवत्वानुमित्यैवनिर्दुष्टमिति। कोलाहलेदृष्टानास्तिकैर्वेगत्वज्ञातौमानमस्तितत्कुतस्तत्पाम्यथासिद्धिरित्यत्रचे
गत्वादिजातिसाधकमानान्तरमाहकिंचेति।। प्राच्यादीति। यत्रदेशेशब्दउत्पद्यतेतद्देशप्रभवत्वमित्यर्थः। सचदेशःकस्यचित्प्राचीकस्यचिदप्र
त्यतिनैकत्रविरुद्धजातिद्वयसमावेशशंकस्यापीतिभावः। अननुगतत्वेनेति। सकलसाधारणशुकप्रभवत्वरूपैकोपाधिवज्ञानागत्वसाधार
णैकधर्माभावेननतस्यानुगतत्वादितिभावः। तेवाश्रयदृति। नन्वयमयस्मिंवातःसत्योघ्यवजिहीर्षयाप्यवहन्नेव्यक्तानेचजातेस्ववहा

राथेमन्यानपेक्षणात्। अपिच। तारत्वादिर्न जातिस्तन्यूनानतिरिक्तव्यक्तिवृत्तित्वात्। यदेवत्वस्यैकापेक्षयातारत्वं तदेवान्यापेक्षयामंदत्वमिति मंदत्व
स्यतदन्यूनानतिरिक्तवृत्तित्वात्। अत्राहुः। व्यवहारः शब्दप्रयोगात्माप्रवृत्तिनिमित्ततानमपेक्षते न च तारशब्दप्रयोगे सजातीयसाक्षात्कारप्रतिबंध
कतावच्छेदकजातिमानयमित्यात्मके विशिष्टवैशिष्ट्यावगाहिनिविशेषणीभूतप्रवृत्तिनिमित्तनिश्चयः। सजातीयोपस्थितिविनैसाक्ष
येगरत्वमारोगृहीतेपि जातिविशेषतद्विशेष्यणाग्रहसापेक्षतया प्रवृत्तिनिमित्तग्रहविलंबेन शब्दप्रयोगविलंबः। ननु यावद्व्यवहारीयज्ञा
नेपि व्यवहारार्थमन्यापेक्षापीतिचेत्यथाशयः। अन्यूनातिरिक्तव्यक्तिकतयावन्नजातित्वबाधः किंतु घटत्वकलशत्ववद्भेदविरहः। तथाचप्रका
रांतराभावात् बाधकाभावाच्च तज्जातित्वमावश्यकमिति। भेदस्तयोर्नास्तीतिचेदुच्यते। यदेवत्वस्य वस्त्वेकापेक्षया तारत्वं तदेवान्यापेक्षयामंद
त्वमित्येकस्यैव प्रतिबध्यप्रतिबंधकतावच्छेदकलक्षणानानाधर्मसमावेशात्तानायदप्रयोगः। नचैवमुभयोरभेदे तन्निबंधनविरुद्धधर्माध्या
सो विरुध्यतइति वाच्यं। एकप्रतियोगिकतारत्वमंदत्वयोर्विरोधेनतन्निबंधनविरुद्धधर्माध्यासोपन्यासाविरोधादितिकु। ननु तारत्वमेव तु गात
गत्वं तु नानास्तित्वमत आह। गकारेत्विति। गत्वत्विसर्थः। अननुगमश्चेति। अत्राननुगमकप्रकारांतरस्वतत्त्वानुगमकप्रकारांतराभावेन तदर्कत्वे
ते व्याप्यतारत्वादिनानात्वस्वीकारादित्यर्थः। एतच्च सर्वव्यक्तिविशेषानुमायकजात्यभिप्रायेणोक्तं। इदानींतारत्वाद्यभिप्रायेणोक्तमिति। अ

पौनरुक्त्यमिति ध्येयं। तज्जातीयत्वेन। नन्विदमयुक्तं प्रतीत्यैव विरोधात्॥ आहुर्वैविध्यादर्शनान् किंच तत्पदस्य स्ववेनामशब्दतया प्रवृत्त
वाचकत्वेन धर्मेयरत्वधर्मिपरत्वं वा। आद्ये तत्पदसमभिव्याहृते वकारस्याभेदमुखस्य तत्तया वाधः। द्वितीये वासंभवः स्फुटएव। किं
च। श्यामो मधुरस्तदुत्पन्न इत्यामपाकदशायां बुद्धिव्यपदेशवदिहापि गकारान्तिमजकवायत्वविनाशाविषयकएवतद्वृत्तादविना
शबुद्धिव्यपदेशादिः स्यादितिविषयत्वेदव्यक्त्वावैपरीत्यमपिकृतेन स्यादिति। अत्राहुः। तत्पदसमभिव्याहृतएवकारोऽभेदमुख
त्वेः तत्पदं चाभेदभानाभावात्ज्ञात्याश्रयत्वेन तद्व्यक्तिपरमिति तदभेदपरस्तथाव्यपदेशस्तथैव प्रतीतेः। अभेदभाने तु तत्त्वजात्या
द्विंगितपरत्वेन्यावत्तद्व्यक्तिपरमिति सामान्यभेदाभावपरः। ततएव सामान्यशब्दस्य व्यक्तिविशेषव्यक्तिसामान्यवचनत्वभेदेनात्र
घटत्वमोमाभावतदवच्छिन्नाभावाभावाभावोभयपरत्वात्। वैपरीत्यमवच्छेदकानुगौरवात् निरसनीयानानात्तानानां विषयांतरकल्प
नायेक्ष्या प्रत्यभिज्ञानमात्रविषयभेदकल्पनायां लाघवादिति दिक्। ननु तथापि कदाचित्तेषां केदाचित्तज्जातीयोपमितिबुद्धिव्यप
देशयोः किं विषयमकमितिचेत्। सत्यं। यत्र स्वतो विलक्षणात्तयोज्ञत्वेप्यतात्पवच्छिन्नाभेदज्ञानं तत्र सोयमितियत्रनुगामित्वेन उपस्थि
तजात्यवच्छिन्नात्वेदज्ञानं तत्र तज्जातीयोपमितिबुद्धिव्यपदेशाविति। अस्मदादीति। इंद्रियग्राह्यजातिमानात्मापीति वहिःपदार्थो हि र

सि॰मु॰ द्रियग्राह्या जातिरस्तीति जातिमत्त्वाद्वहिरिन्द्रियजन्यसामान्यप्रत्यासत्तिजन्योपनीतभानाश्रयानित्यस्यापि जातिमतो विषयोक
८० रणामित्यस्मदादीति। लौकिकज्ञानवदित्यर्थः। तेन लौकिकवहिरिन्द्रियजन्यज्ञानविषयजातिमत्त्वादिति हेत्वर्थः। ननु योगि
वहिरिन्द्रियविषयासपरमाण्वादिव्यभिचारवारणायास्मदादीति। तथा सति तु तेव्यभिचारावारणात्। किंच। योगजधर्मानुग्रहसंवाक्षुषप
ति किंतु वस्तुस्वभावाप्रवाचमेन प्रवर्तमानोन्द्रियस्य यत्र योग्यत्वमभिहितमपि ग्राह्यतीति असन्निकृष्टसन्निकर्षेनुपपद्यकल्प
ते। शक्यानेष्ठणोति योजनशतादिस्यादिव्यवसरमारणादिग्राहकत्वप्रतिपादकागमाश्रवणात्। तथा च वहिरिन्द्रियग्राह्यजातिम
त्त्वं न तस्येवेति कव्यभिचारशंकापत्तोस्मदादिपदमिति यथोक्ते एवार्थो ग्रन्थस्येति। व्यापकेति। एतच्च मतभेदेन विशिष्यहेतुरूपव्या
पकसमवेतविशेषगुणत्वादिति। हमेतप्रत्यक्षविशेषगुणत्वादिति समन्मते। प्रथमस्यास्मन्मते भगवत्ज्ञानादौ द्वितीयस्य तन्मते रू
पादौ व्यभिचारादिति दिक्। अनात्मेति। आत्मैकत्वे व्यभिचारवारणायानात्मेति। तस्य च आत्मासमवेतत्वसार्थः। प्रसक्ष्यपदं जलप
रमाणुरूपादावनैकान्त्यवारणाय। नूपपत्वादौतद्वारणाय गुणपदमिति भावः। अव्याप्येति। स्वात्यताभावसमानाधिकरणत्वात्। अस रा॰ म॰
ताभावत्वं चात्र नित्यसंसर्गाभावत्वमिति संयोगरूपस्वात्यताभावसमानाधिकरणे संयोगात्यन्ताभावेन व्यभिचारः। अथवा। व्याप्यवृ ८०

त्तित्वमवच्छिन्नवृत्तित्वं संयोगस्य तादृशाभावे व्यभिचारवारणाय गुणपदं प्रयोज्यमिति भावः। यद्यात्मवृत्तित्वसमवायेन प्राविवक्षितं।
ईश्वरज्ञानत्वमिति। ईश्वरज्ञानादिकमित्यर्थः। बहिरिति। इंद्रियांतराग्राह्यत्वे सतींद्रियग्राह्यत्वमिंद्रियव्यवस्थाहेतुत्वं तावन्मात्रमा
त्मैकत्वगतमत उक्तं। बहिरिंद्रियेति। तथा च बहिरिंद्रियांतराग्राह्यत्वे सति बहिरिंद्रियग्राह्यत्वं तावन्मात्रवृत्तिरूपत्वादौ व्यभिचारीति गु
णत्वादिसुत्तं अत्र च बहिरिंद्रियग्राह्यत्वे आत्मैकत्वे व्यभिचारवारणाय पक्षे वेयदिंद्रियाग्राह्यत्वेंद्रियांतराग्राह्यत्वबहिरिंद्रिय
ग्राह्यत्वं चांक्रियेत तदा सर्वथाविरोध इति बहिरिंद्रियांतराग्राह्यत्वविशेषणमुक्तं। उत्कर्षेति। अत्र जातिपदमनोमहानुत्कृष्ट इत्या
दिपदप्रयोगमात्रपरिमाणस्यापि तत्प्रवृत्तिनिमित्तत्वेन तद्धिति आकाशादौ व्यभिचारवारणायेति भावः। यद्यपीदं परमाणुपरिमाणास्
र महत्परिमाणमुत्कृष्टमिति प्रयोगात् व्योमादिपरिमाणेऽनंततथाप्युभयशब्दप्रवृत्तिनिमित्तजातिर्विवक्षिता। साधनेति। यदवच्छिन्ने
साध्यं प्रसुपाधेरव्यभिचारस्तस्य बहिरिंद्रियव्यवस्थाहेतुगुणत्वादेः साधनस्यावच्छेदकत्वं दृष्टव्यं न तु सर्वस्य उत्कर्षगर्भादेः साधन
स्यावच्छेदकत्वे गुणत्वादेः साध्याव्यापकत्वादिति। यद्वा तु द्रव्यनयोर्वा पर्वोयास्तदा न कोपि साध्याव्यापकत्वेति अतो दोषात। माहस्पर्शेद्
ति। वस्तुतः स्पर्शवत्समवेतत्वे व्यर्थविशेषणप्रवेशाद्ववेशाभ्यां साध्याव्यापकत्वग्राहसंभवात्। न तु तस्य साधनव्यापकत्वमिति चेत्। स

मि॰ स्मृ॰ ४१

त्यजतर्हि तमुपाधिं विशेषणाप्रवेशविशाभ्यां साध्याव्यापकत्वसाधनव्यापकत्वसंभवादिति। तथापीति। कालोपाधित्वं तन्नष्टा
स्यव्याप्यमित्यर्थः। स्यादेतदिति। न च तथापीत्यनेनानित्यत्वाभ्युपगमदर्शनाद्दोषनित्यानुमेयतायां प्रवाहस्यासंभवादिति वाच्यं तथा
पीस्मादेराक्षेपस्यस्मरसाचारेत्यादिनैवोत्तरेणानिराकरणात् तत्प्रसंगेन स्यादेतदित्यादिना वाप्यंतरावतारणात्। प्रवाहाविच्छेदेऽवदस्य सर्व
दातुल्यत्वपत्तायथेकत्रकालेसत्तथास्मरणापीति विवक्षितं तत्प्रविच्छेदेन संभवतीति सर्वदानुमेयतां व्यवस्थापयति स्यादेतदितीदृति कश्चित।
विवादेति। स्मृतिमात्रपक्षीकरणे शतो बाधसिद्धसाधने मस्मृतामितस्सर्ववोधकत्वे विवादपदत्वं च विशेषणं। अन्यतरविशेषणमात्रोपादाने
पितदुभयप्रसंगात्। न च तदुभयमेवानुक्तस्मृतिग्रहणेनेति वाच्यं तादृशस्मृवेदसाधारणत्वेनान्यातोवाधापत्तेः॥ न च लोभस्याप्यमूलकस्म
त्यारप्पिकराविन्नादृशविवादपदत्वसंभवेनाशतो वाधः। अपूर्ववोधकत्वेनाप्रमाणकत्वस्योक्तत्वादिति भावः। स्मृतपर्यतीति॥ स्मृत्यर्थानु
भवजन्यकवेदमूलकत्वमत्रातेनवेदेनाप्यव्यापिना न संभवतीति पक्षस्य धर्मताबलादनुमेयस्यापि वेदस्य पर्यवसानमिति भावः। अविगीत
ति। लोभमूलकस्मृतेर्विगीतत्वात् न्यायमूलकस्मृतेर्महाजनापरिगृहीतत्वाद्व्यभिचारित्वात्रितयमप्युपात्तं। महाजनश्चात्र दृष्टार्थि स्मृ॰
पुरुष इति भावः। ननु वेदमूलकत्वा वेदपरंपराकारणात् तयापि निर्वहतीति उच्छिन्नवेदमूलकतयापि संभावितं न वेदस्थैर्ये प्रमाणमि ४१

त्यत आह वेदेति। ननु वेदार्थप्रमापकत्वस्य स्मृतित्वं चेत्स्यात्तर्हि वेदानुमानात् प्रागनुपस्थितस्मृतिपदप्रवृत्तिनिमित्तापरिचयाद्दुर्ग्रहमिय
मित्यत आह। वेदार्थेति वेदार्थता स्मृतिता चेत्यर्थः। तथा च यावदर्थं नृपादृष्टप्रमापकत्वेन स्मृतित्वेन च प्रसिद्धाता हि मन्वेव वेदमूल
कत्वविवादविषयः पक्षः न च विवादविषयतावच्छेदकं नृपापरिचयः। उभयसिद्धान्तेतरकोटिकान्यतमस्यैव तत्त्वादिति भावः। साध्याप्रसि
द्धिं परिहरति स्मृत्यर्थ इति। ज्ञानान्तरेति। न च तादृशज्ञानगोचरतयैव वेदार्थस्यैव वेदानुवादक इति वाच्यं। न हि यथाकथंचिदुपस्थितार्थ
बोधकतामात्रेणानुवादकता मन्वादेकदा वेदार्थावगमे पुनरुक्तेन तदर्थबोधजननान्नेदृशस्याप्यनुवादकता। तद्विनापि कदाचित्तेनार्थबोध
जननात्। अपि त्ववश्यापेक्षणीयनिरपेक्षप्रमाणबोधितार्थप्रमापकत्वं। तथा च यत्र केषांचित्प्रत्यक्षादिबोधितार्थप्रमापकत्वात् प्रत्यक्षवेदाना।
न च स्मृतिर्निरपेक्षप्रमाणं। अवश्यापेक्षणीया वा। स्मृत्यर्थगोचराचारादप्यनुमानसंभवेन तथानुमितवेदस्यापि तदर्थबोधकत्वादिति भा
वः। तस्येति। कार्येणाकारणानुमाने कारणस्यात् तद्विषयत्वमिति तत्सिद्धान्त इति प्रागेव कथनादिति भावः। उपपन्नेत इति न्यायनयेऽभिमन्ति
त इति गुरुमतेऽभिप्रायत इति उभयमते। व्यभिचारादिति। घटमानयानय घटमिति उभाभ्यां वाक्याभ्यामन्वयबोधदर्शनादिति भावः। अव्यभि
चारीति। अनुगतेत्यर्थः। ननु यथानुपूर्वीनप्रयोजिका तदानदेशीनेत्याहाव विशेषापत्तिरित्यत आह। तदर्थेति। उच्चारणागर्भवाक्यत्वमा

मि॰श॰ न्द्र तु ज्ञारणाप्राप्यस्यादितित्र्याकते। अथेति। ननु लिप्यनुमितमपि कदाचिदुच्चार्यतएव सुरूचेराह। किंचेति। उच्चार्यमाणत्वं वक्त्रे मानो
४२ च्चारणाविषयत्वमितित्वं उर्थातर्भावेन दूषणमिदं न केवलमित्यंशाहेणीति। अपितु ज्ञायमानकारणमात्रस्यैव ज्ञाप्यज्ञापकत्वेज्ञानमात्रसामग्री
त्वाह। अतएवेति। नत्वन्वयविरोधिपदाजन्यपदार्थोपस्थितित्वेन नञ जनकत्वमन्वयविरोधित्वस्यैव ग्रहेतुमशक्यत्वात्। विभक्त्याद्यसमभि
व्याहृतत्वमन्वयविरोधित्वमितिचेत्। न। एवं सति विभक्त्यादिसमभिव्याहृतपदत्वेनैव जनकत्वस्य लाघवेन संभवात्। ननु विभक्त्याद्यसमभि
व्याहृतपदाजन्यो। पस्थितित्वेन गौरवात्। एवं च पदार्थोपस्थितिमात्रस्यात्र तु वाक्यार्थानुभवोऽनुमितेर्वदादिस्वरसान्मतांतरमाह। वस्तु
तस्त्विति। तन्निरपेक्षेति। तद्विनु पलक्षणं पथार्थतात्पर्यकत्वं वीलक्षणं शाब्दबोधसामान्यसामग्र्या नैरपेक्ष्यमपि दृष्टव्यं। न मुतदुभयनैरपे
क्ष्यमव्यं पुक्तम संसर्गाग्रहाद्विशिष्टधी सामग्री स्यादित्यरुचेराह। ये। गपतेति। स्मृतिस्थलीयप्रकारमावारस्थलेव्याप्तिदिशति। एवमिति।
यत्नेवक्तृत्वेनानुमितोवेदत्वेबोधयतीति। अन्यैवात्र शाब्दबोधसामग्री। तथा मंगलकर्त्तव्यतामनुमायतां पक्षयित्वा वेदबोधितत्वानुमानेवि
शिष्टबोधकतयावेदानुमितइतिविशिष्टबोधयतिवेदबोधितकर्त्तव्यतानुमानेनुमंगलबोधकतयावेदान्मंगलावगमः स्यादितिपदार्थमा राम॰
त्रेकर्त्तव्यतावुध्येत। ननु विशिष्टकर्त्तव्यतावाक्यार्थ इति। अभिसंधायाह नत्विति। ननु यदि सामग्रीद्वये तथा विभक्त्यादिसमभिव्याहारा ४२

णांमंगलकर्त्तव्यतांबोधयन्ननुमितेर्वेदोमंगलकर्त्तव्यतांबोधयिष्यतीत्यतआहविभक्तीति।अनुमितेर्विभक्त्यादिसमभिव्याहाराल्ल
कसमभ्यसुभावादित्यर्थः।ननुतत्समभिव्याहृतएवानुमीयतामित्यतआह।मंगलमिति।अविनाभावादिस्तूपलक्षणं।अध्यापरासंश
यांस्वादेनेनाश्वासार्थंचेत्यपिद्रष्टव्यं।अन्यथास्मृतितएवसमस्तार्थोपस्थितौतत्रापिवेदानुमानंनस्यादित्यवधेयं।अत्रेतिकलादेर्वयेणपता
वच्छेदकत्वादितिभावः।वस्तुव्यापारघटितस्येति।एतच्चवस्तुगतिमनुरुध्येति।वस्तुतःईश्वराचाराणांतादृशाचारान्तरासंभवेनतन्मूलत्वमसंभावित
मेवनहिस्वेष्टसाधनतामो नारम्याननुमापप्रवर्त्तितुमर्हतीति।नचभगवदाचारेस्वेष्टसाधनतानुपसाध्यप्रसिद्ध्येनतद्दृष्टोतन्मूलकत्वाभ्या
चारान्तरसंभवेत्।नचविश्वविषयेच्छायास्वेष्टप्रसिद्धिरीश्वरे।समाप्तिरूपफलपारिशेष्याभावेनतत्फलसाधनतानवगमेतदर्थितयामंगला
प्रवृत्तिप्रसंगादित्याद्युक्तं।किंतुतादृशेति।नवेदमन्यान्याश्रयस्तत्र।आचारस्यवेदाम्नलकत्ववादिनंप्रतितादृशाद्दस्यवेदत्वेसाधितेतथाप्
तिनिश्चयः।तथाप्यैतादृशाद्दस्यवेदत्वसिद्धिरितिवाच्यं।भावानभ्यमात।तादृशाचारस्यालौकिकाविगीताचारस्यवेदमूलकत्वनियमा
तदुक्तस्यशाद्दत्वउपजीविप्रमाणानितिरिक्तप्रमाणान्यप्रतीत्यविषयार्थकशाद्दमूलकत्वनियमादितितात्पर्यं।तथाचतादृशशाद्दस्यभगवदी
यत्वेनभ्रमाद्यजन्यवाक्यार्थज्ञानाजन्यत्वमुभयसिद्धमेवसमर्थवशास्यत्रमेववेदत्वमितिवेदमूलकत्वसिद्धिरिति।कालेति॥घटप्रागभा

नि॰ श॰ ४३ वस्यपक्षीकृतस्याकाशत्वादिहेत्वितपाऽर्थांतरमाभूदितिवाच्यस्फोरणायकालकपालान्यावृत्तित्वंतत्रतत्प्रागभावाधारत्वभावावे
द्कविशेषणमिदं।तेनकपालस्यकार्यद्रव्यानधिकरणत्वमेवनसंभवतिकार्यद्रव्यानधिकरणत्वेनकार्यद्रव्याधिकरणभिन्नत्वस्यविव
क्षितत्वात्।अतःपक्षधर्मताबलान्नादृशकालसिद्धिःनचदिशार्थांतरं।दिशोपितादृप्यनतादृशकालानतर्भावेन।नहीदानींकार्यदिक्
मकालकार्यद्रव्यध्वंसःप्रतीयते।तथाचतथासिद्धावप्यसिमतकालसिद्धिरप्रत्यूहानचदिशोपिप्रागभावाधिकरणत्वेकालकपालान्या
वृत्तित्वविशेषणवाधःकालपदेनसाधारणाधिकरणमात्रस्यविवक्षितत्वात्साधारणानधिकरणविभ्वस्यदिक्कालावेव।यत्तुकार्यद्रव्याना
धारत्वंयदिकार्यद्रव्याधिकरणाभिन्नत्वंतदावाधापत्तिर्नेहितादृशप्रागभावसत्वशंका।नचकालएवनतथातस्यकार्यद्रव्याधिकरणत्वस्यै
कत्वात्तद्भिन्नत्वाभावात्।नचखंडप्रलयात्मककालोपाधिस्तथा।उपाधेरनधिकरणत्वात्।उपाधिमतःकालस्यतद्भिन्नत्वाभावात्भेदाभेदानभ्यु
पगमात्।नहिश्यामघटात्पाकरक्तोघटोभिन्नइतिसंभवतिपरंतुश्यामत्वाभावमात्रमिति।तत्रउपाधिविशिष्टस्याधिकरणत्वेउपाधेरप्यधि राम॰
करणत्वादितिदिक्।कार्यद्रव्यानाधारत्वमहाप्रलयेनार्थांतरत्वापादकेमाभूदितिभावकार्याधिकरणत्वेविशेषणमितिसाध्यांतरमुक्त ४३
मितिकेचित्।तन्न।प्रागभावस्यमहाप्रलयवृत्तित्ववाधादेवतदसंभवात्।तस्मादुक्तानुपपत्त्यावांतरप्रलयपदार्थेतथा।स्साधनायविशिष्टप्रति

जानीते कार्येतित्तत्वं। अभावत्वादिति। एतच्च यथाश्रुते यद्यपि कार्यद्रव्यानधिकरणान्योन्याभावे व्यभिचारि तथापि घटत्वनिरूपिताभाव
त्वादित्यत्र तात्पर्यं॰ तेन कार्यद्रव्यानधिकरणत्वात्यन्ताभावेपि न व्यभिचारः। तस्याभावप्रतियोगिकतयाभावरूपत्वात्। अभावत्वेन सुप्र
भावस्याविवक्षितत्वात् तथा च तत्तत्कार्यद्रव्यानधिकरणान्योन्याभावोपि कार्यद्रव्यानधिकरणोपि साधयिषितकाले वर्त्तत एवातो न पक्षस
मानता व्यभिचारः। अन्यथा निरुक्तत्वव्याघातात्। न चान्योन्याभावस्य प्रतियोगितावच्छेदकविरोधनियमभंगापत्तिः। हेतुभेदेन तत्संभवात्।
न हि कार्यद्रव्यानधिकरणान्योन्याभावो ऽयं काल॰ कार्यद्रव्यानधिकरणाभिन्न इत्यनयोः प्रतीत्योर्हि न चैव विरोधैव विरुद्ध इति न चानुभवविरोधः
। एकत्र कालस्य कालत्वेनाधिकरणत्वादन्यत्र देशत्वेनेति कथमन्यथा कालान्योन्याभावस्य निरुक्ततया कालवृत्तित्वेपि देशतया न कालाधि
करणं। अन्यथा कालः कालभिन्न इति प्रतीत्यापत्तेरिति दिक्। द्वितीयसाध्ये वाभावत्वमनाद्यभावत्वमत एवान्योन्याभावपर्यन्तं दृष्टान्तमतो
न महाप्रलयाव्यवहितपदार्थध्वंसे व्यभिचारः। कार्यत्वात्। इदानीन्तनकार्यत्वात् तेन महाप्रलयाव्यवहितकार्येण व्यभिचारः। कार्यमात्रेति
। मात्रपदस्य कार्त्स्न्यपरत्वेन कार्यपदस्य विभाजकोपाध्यवच्छिन्नकार्यपरत्वेन विभाजकोपाध्यवच्छिन्नपावा कार्यहेतुत्वादिसर्थः। तेन चरम
क्रियात्वादैन व्यभिचार इति भावः। अन्यथा यथाश्रुते मात्रपदवैयर्थ्यं कार्यतावच्छेदकत्वविवक्षायामुक्तो व्यभिचारः महाप्रलयाव्यवहि

मि·श्रा· नशादृष्टत्रिचेत्तजन्मतावच्छेदकावांतरजातित्वांकयाव्यभिचारसंशयइति। अनादित्वावच्छेदकधर्म्मत्वविवक्षायां च सजातीयध्वंसव्याप्य
४४ प्रागभावप्रतियोगित्वमनादित्वं निर्वाच्यमिति व्याप्तेः सामानाधिकरण्यप्रवेशावश्यकतया ध्वंसव्याप्यत्वे प्रागभावस्य कालिके प्रागभा
वसमानकालत्वा ध्वंसस्य प्रविष्टेचेति प्रागभावसमानकालध्वंसिप्रतियोगिवृत्तित्वमात्रस्य सामर्थ्ये ध्वंससमानकालध्वंसिप्रतियोगिवृत्ति
त्वमात्रस्य सामर्थ्ये ध्वंससमानकालप्रागभावप्रतियोगितावच्छेदकत्वमर्थे विशेषणत्वमिति। यथोक्त एवहेत्वर्थः। न च द्व्यणुकादीनाम
ताप्रलयेपि क्रमिकनाशात्स्यान्महाप्रलयप्राक्कालेनार्थान्तरं। स्थूलकालोपाधिमादाय समानकालतायाविवक्षितत्वात्। तथान्तकालस
सूक्ष्मत्वादिति ध्येयम्। एककालीना इति। स्पर्शवन्त इति परिणामे। अन्यथा मनसां शक्तौ बाधापत्तेः। उपादेयप्रबन्धे सादावुपादेयपदस्य स्वोपा
देयद्व्यणुकपरत्वात् अन्यथा बाधः सर्वत्र सर्वोपादेयप्रबन्धस्यानन्त्यस्वीकारात्। गुणादिसत्त्वे। अन्यपदस्याध्वंसपरत्वेन। अन्यथा बाधस्य स्फुटत्वात् अत
एव हेतुरपि जनकत्वादिस्तु। अन्यथा मेयत्वादिकमेव क्रियेतेति भावः। जनकत्वात् द्रव्यसमवायिकारणत्वात्। अन्यथोक्त एव व्यभिचाराप
त्तेः। परमाणाविति। प्रत्येकं स्वधर्मावच्छिन्नपक्षाः कार्यद्रव्यानधिकरणवृत्तिकार्यवत्त्वं च साध्यं वस्तुतः दृश्यकार्यानधिकरणतावच्छेदकावच्छिन्नत्वं रा·म·
तेन परमाणावाकाशसंयोगादित्वेन सिद्धसाधनं। प्रत्येकं संयोगाधिकरणतानवच्छेदकावच्छिन्नत्वात्। मिलितस्यैव व्यासज्यवृत्तिधर्माधिकर ४५

तावच्छेदकावच्छिन्नत्वादिति भावः कार्यपदं प्रागभावावच्छिन्नसत्ताकपरमतोन महाप्रलयेनार्थान्तरमिति ध्येयम्। नित्येति। नित्यत्वं गुणा
देर्ध्वंसत्वघटादौ व्यभिचारीति द्वयमुपात्तमिति भावः॥ भूगोलकेति। अवयवानामावायोद्वारेण भूगोलकस्यापि नाशोत्पादात् मध्ये
देशेनाप्यर्थान्तरमिति संतानग्रहणं। यद्यपि यथाश्रुते महाप्रलयेनार्थान्तरं दुःस्थं तथापि प्रागेव कार्याधिकरणानि स्थलेन ध्वंसो विशेष्यः
साध्येषु सर्वत्र कार्यद्रव्यं भूगोलकोपेतेन तत्तद्ब्रह्माण्डावच्छिन्नत्वेन विशेषणीयम् अन्यथाप्रयोजकत्वात्। न हि ब्रह्माण्डान्तरवर्त्तिकार्यद्रव्याणाम
पि भूगपधिनाशमाणमोवेव पतियेन विपक्षबाधको भवेदत एव वक्ष्यमाणमेपेति। अत एव चात्र ब्रह्माण्डप्रलयेत्र ब्रह्माण्डान्तरप्रलयसं
शयेन प्रागभावलक्षणोपरत्वगर्भप्रलयकालीनपरमाणुक्रियायाः प्रागभावाभासिसंदेह इति तल्लक्षणान्तरमाश्रीयत इति। एतदिति। पक्षे
धर्मतावलात्। स एकः कालः पर्यवस्यतीति भावः। न चात्रेति। एषूक्तानुमानेष्वित्यर्थः। सर्वेषामिति। सर्वेषामनुमानानामुक्तरूपसाध्य
व्याप्यत्वादित्यर्थः। अनेवंभावे उक्तरूपसाध्यव्याप्यत्वाभावे स्वभावप्रच्यवात्। उपाध्यनुपलम्भेन नातोपाधिकत्वस्वभावस्य निश्चित
त्वप्रत्यवापत्तेः। ननु कश्चिदुपाधिः स्यादिति शंकायामनौपाधिकत्वनिश्चय एव कथं स्यादित्यत आह। अन्यथेति। एतादृशशंकास्कंदनेन
व्यक्तौ व्यनियामकसहस्राणामपि तथाशंकास्कंदनेन अपर्यवस्यात् अनवस्था स्यादिति भावः। ननु यावत्स्वाव्यभिचारित्वमिति न्यायपाठं

मि॰प्रा॰ ८५

कार्यंदनायकिंचिदवश्यंवाच्यंअन्यथालिंगंचार्वाकेविसतोनियामकमाहआगमइति।यद्वास्तवेत्रनियामकेनियामकंतरापेक्षाका
याविप्रमाणाप्यानततत्रियामकाभिधानेनैवपुरुषापुरुषपर्योमोवारंतरावतारेनस्मादिसेवानवस्थेत्यर्थः।तदिदमुक्तंक्तं।प्रसक्तो
नुप्रसक्तेति।आचारेतिप्रवृत्तिजनकत्वेवेदस्यसाक्षादसाधकस्यद्वाराधीनेद्वारचेतानमिछाव।तानमनुत्पाद्यचनेछासाक्षाद्विष्टाजन
नेशाद्वासामर्थ्यादन्यथातिप्रसंगात्।नचान्यतद्वारत्वेनशंकास्पदमपीतिपरिशेषात्तानमेवद्वारमितितत्छिवार्यतइतिभावः।तत्राभिधेति।
तत्राभिधालिङ्प्रत्यर्थःसैवचप्रवर्तिकेतिभाट्टाः।तेषांचायमाशयः।द्विविधाभावनार्थाभावनाशाब्दभावनाचसाचमकरोतिकर्तृव्यत्ताये
क्षितत्वादंशत्रयवती।अन्यथास्वर्गादिकफलनभावयेत्सैतत्त्रितयाधीनत्वात्।तत्राद्यार्थविषयत्वेनार्थभावनापदवाच्या।फलोत्पत्त्यनुकूल
कर्तृशक्तिमात्रंसर्वाख्यातसाधारणंकर्तृत्वात्तितततनोअचेतनस्यरथादेः।तदस्याचशब्दनिष्ठतयाशब्दव्यापारतयाचशब्दभावनापदवाच्याप्रव
र्तनालिङर्थः।तदुक्तंअभिधांभावनामाहुरन्यामेवलिङादयः।अर्थात्मभावनात्वन्यासर्वाख्यातस्यगोचरइति।अर्थात्मत्वेचार्थगोचरत्व
।शब्दभावनाचकिंकेनकथमितित्र्यंशत्रयवती।तदाहलिङोभिधासैवचशब्दभावनाभाव्यांचतस्याःपुरुषप्रवृत्तिः।संबंधबोधःकरणंतदो
यप्ररोचनाचांगतयोपयुज्यतइति।लिङ्॰त्वावदभिधानामकोव्यापारोलिङ्॰निष्ठावश्याभ्युपेयः।करणस्यव्यापारनिष्ठव्यापारजनकत्वस्व राम॰ ८५

निष्ठव्यापारद्वाराहृष्टयथा दण्डकाष्ठादेश्चक्रभ्रमिविशिष्टत्वादिजनकत्वं स्वनिष्ठस्पन्दद्वारचलनादिद्वारा। नचव्यापारस्यफलित्वापातः। अनवस्था
वेति वस्तुव्यापारस्याकारणत्वात्। व्यापारिणा एव तथात्वात्। व्यापारभिन्नत्वे नैतादृशव्यापारः परनिष्ठ यदमप्येतदर्थमेव। अन्यथाव्यभिचा
रान। वस्तुप्रोरन्यतरप्रसंगात्। इति ज्ञानदिव्यापारकत्वस्योभयसम्मतत्वात् सिद्धसाधनमापद्यते इति स्वनिष्ठत्वगर्भमाध्यं तत्र किमित्याका
क्षायां प्रवर्त्तपुरुषप्रवृत्तिरेव भाव्याकेनेत्याकाङ्क्षायां संबंधेति। अथ तु सत्रस्य लिङः शब्दादपि अप्रवृत्तस्य संबंधबोधस्वच्छक्तिग्रह सहकारि
त्वार्थः कथमित्याकाङ्क्षायां प्ररोचनाचागतपाववसीदेत्सा विधिशक्तेः तेन कतयोपयोगिनीप्राशस्त्यज्ञानेपुरुषप्रवृत्तेः स्तुतिरूपतेति का भवतीति
इत्यात्रतत्वा। अभिधायिनतत्वेनज्ञातास्वरूपसतीवा हेतुरिति प्रसंगादिति प्रवर्त्तनात्वेनज्ञाता न च निःफलेतुः सैवकफलेवाकम्प्रतिसातथा
सांतु शक्यते अपितु भावनात्वेन ज्ञाता न च भाव्यानुपस्थितौ तत्संभवः नच क्रियाभाव्याकष्टत्वादितिसमभिव्याहृतफलं प्रतिभावनात्वेन
ज्ञाता। अतएवाश्रुतफले विश्वजिदादौ फलं कल्प्यते संबंधपथ्यपीष्टसाधनतापर्यवसितातथापि क्रियागतमिष्टसाधनत्वं न विध्यर्थः अपि
त्वभिधागतमिति विशेषः। तदेव क्रियागतविनानेसाक्षिप्त तदिष्टसाधनत्वावबोधः। तदयं पर्यवसितोर्थः। उक्तपुरुषवष्टंभेनाभिधाव्यापारविषया
या प्रवर्त्तनात्वभावनात्वज्ञानानुकूलव्यापाराश्रयत्वं लिङ्पदस्य एककार्यप्रवृत्त्यनुकूलाः व्यापाराश्च ज्ञानानुकूला इति शक्तिचतुष्टयमिति। तत्रायं सेके तनि

मि॰शा॰ त्राधामभिधायाज्ञानाभावात्शब्दस्य चव्यवहाराधीनव्युत्पत्तिकत्वेन ज्ञानमात्रजनकत्वावधारणात्। न तु प्रवृत्तिजनकत्वावधारणादित्यन्वि
५६ ताभिधानेवक्ष्यमाणत्वात्। लोकेवाक्यस्यावश्यकेष्टसाधनताज्ञानमात्रव्यापारकत्वेनान्यथोपपत्तेरभिधालक्षणाव्यापारानपेक्षणात्। न
चकारणस्येत्यादिनियमात्तथानियमेस्वनिष्टत्वस्य गौरवेणाव्यर्थतयाप्रयोजकत्वात्। व्याप्तिस्मृत्यादावुक्तो नियमव्यभिचारश्चेतस्योऽनुमित्या
दिकारणत्वात्। तस्मादवश्यवाच्यकेष्टसाधनत्वमेव लिङर्थो नाभिधेति। तदिदमुक्तमसत्यपि प्रवृत्तेरिति। तस्मिन्सतीत्यादिहेतुश्च संकल्पा
पर्वादे। उक्तसाध्येषु यथायोगंपहेतुद्वयान्वयादिति। अपरे तु विधिशब्दश्रोविणा प्रवृत्तिदर्शनेन व्युत्पित्सुस्वप्रवृत्तिजनकत्वेनावधारितेच्छां किं
कल्पयति। ताहृशी चैतेनेच्छा ज्ञाता। तच्च सैव लिङर्थ इति वदन्ति। तदपि न। एवमपि हि लिङ॰च्छाज्ञानं जन्यतेन च तत तस्य वर्तके स्वर्गकामादि
पदादेवनत्वाभेनामत लभ्यतया तच्छाकल्पनात्। न च छैवलिप्रजन्यतेवाधादिति। अन्ये तु पूर्वमेव विभ्रमर्थः। वैदिके तत्तज्ज्ञानस्येव प्रवर्तके
त्वादिति वदन्ति। तदप्यसत्। अपूर्वत्वव्याघातात्। अपूर्वपदादपि प्रवृत्तेसायत्तेश्च वेवितु भावनाप्रयत्नज्ञानं प्रवर्तकमिति सा विभ्रमर्थ इति व
दति। एतदपि सर्वास्यात साधारणानोचितमिति मनसिकृत्य संक्षिप्य कथयेम दूषितवान्। तस्मिन्नित्यादिना हेतुद्वयं च यथायोग्यमित्युक्ते। रम॰
अभिधायामभावेन तस्मिन्सतीत्यादिहेतोरनन्वयादिति। ज्ञानस्येति। साक्षादसाधनस्य उपायविषयस्य सम्बन्धः। ते न प्रवृत्तिविषयप्रसक्षेफल ५६

ज्ञानेन च न व्यभिचारः तत्र व्यापारीभूतां चिकीर्षां लक्षयति चिकीर्षा चेति। अत एव कृतिसाध्यताप्रकारिकाफलेच्छाप्रीति न च सा प्रवृत्तिहे
तुरिति क्रियाविशेषयत्वं विशेषणं नस्यापि फलविषयत्वं अन्यथा फलस्यापि धात्वर्थतया क्रियात्वेन तत्र चिकीर्षाव्यवच्छेदेन स्याद
त एव कृतसाध्यक्रियायां भ्रमेणाता दृशेच्छासंभवे पिन साकृतो व्यापार इति क्रिया कृतिसाध्यत्वेन वास्तवेन विशेषिता। तादृशविषयता
दृशेच्छायां कृत्यनुत्पादस्य हेतुताभावाधीनत्वनियमादिति भावः॥ पाकमिति। पाकं कृत्या साधयामीत्येवमाकारिकाया इच्छाया अनुभ
वात् कृतिसाध्यत्वेन पाकमिच्छामीत्यनुभवेनेति शेषः। अन्यथा यथाश्रुतेनेति शब्देनेच्छानुभवाकारकथनपरत्वलाभे विरोधादिति भावः। इ
च्छायाः जन्येच्छायाः। स्वप्रकारकेति। स्वप्रकारप्रकारकधीसाध्येत्यर्थः। ननूक्तक्रमेण लाघवावतारे कारणतायां ग्रहप्रयोजकभेदाग्रहादिर
पि न प्रवृत्तिहेतुरभेदग्रहापेक्षया गुरुत्वादित्यस्वरसेनाह॥ इच्छाया इति॥ नन्विदमप्ययुक्तं यत्प्रकारकं ज्ञानं तत्प्रकारिकेच्छेत्यस्य साधनता
ज्ञानजन्यायां तत्प्रकारिकेच्छायां व्यभिचारात्। यत्प्रकारिकेच्छा तत्प्रकारज्ञानसाध्यैवेत्यस्य रजतस्मरणाजन्यभ्रमस्थलीयरजतेच्छायां स्वमते
न व्यभिचारात्॥ यत्प्रकारिकेच्छा तत्प्रकारज्ञानसाध्यैवेत्यस्य रजतस्मरणाजन्यभ्रमस्थलीयरजतेच्छायां स्व) दित्यस्वरसेऽयं हेतुमाह॥
जनकेति॥ साक्षादविरोधिन इति शेषः। तेन बाधप्रतिरोधादौ न व्यभिचार इति भावः॥ ॥लाघवाच्चेति॥ प्रवृत्तिनिमित्तलाघवाच्चेत्यर्थः॥

॥सत्वंतावाच्यत्वंतुप्रवृत्तिविरोधेनगौरवंप्रवृत्तिनिमित्तगौरवेण॥तथाचतत्पदावाच्यापिसाप्रवृत्तिहेतुरितिभावः।अस्तिचेति।पाक
स्यासिद्धतयोद्देश्यविषयसिद्धत्वेओदनस्यासिद्धत्वाच्चफलेच्छाविरहइतिभावः।ननुयतएवगौरवात्सापिचिकीर्षापदवाच्या।ततएवनहे
तुरपि।तथाचलाघवात्कृतीच्छैवकारणं।यद्यपिपाकस्यप्राधान्येच्छाविषयत्वमनुभूयतइतितदपिचिकीर्षापदवाच्याकृतिसाध्य
त्वेनेच्छेस्यमानंननुतद्धेतुत्वात्तदपेक्षयाकृतीच्छालाघवस्यतद्धेतुतानिर्वाहकस्यानुग्रहादित्यस्वारस्यात्कृतीच्छापेक्षयाकृतिसाध्यत्वे
नेच्छायांलाघवमेवप्यवस्थापयति॥वस्तुतस्त्विति॥तेनेति।ननुप्राणपंचकसंचारफलत्वेनप्रवृत्तिविषयत्वमापाद्यतेअपायत्वेनवाआ
द्यतदनुकूलःप्रयत्नःप्राणादावपायःसतुप्राणातीन्द्रियतयादुर्लभःप्रवृत्तिविषयप्रत्यक्षस्यापिनहेतुत्वात्।किंचउपायविषयाकृति
साध्यताधीःप्रवृत्तिहेतुर्ननुफलविषयेत्युक्तेकृतिसाध्यताज्ञानाभावेनोक्तप्रसंगः।अतएवनकृतौयोपिप्राणसंचारस्यातीन्द्रियत्वात्।अपि
चविषयलक्षणादिव्याह।स्वार्थस्वविशेषणावत्ताप्रतिसंधानजन्यत्वंकार्यतानानेविशेषणाभावप्रयुक्तेतथाचकातिप्रसंगइत्येकेति।अत्रा
हुः।संचारवत्वेनप्राणस्यैवोक्तरूपकृतिसाध्यःकृतेःसिद्धत्वस्यासिद्धविषयत्वनियमात्।तथाचतज्ज्ञानाचप्रवृत्तिःपापप्राणस्यैवतन्मतेप्रस ख॰ ५७
क्षत्वात्प्राणोस्तुके।अस्मन्मतेतुप्राणवहनाडीदृष्ट्या।नचमनोवहनाडीवत्तेषामायत्तिः।फलवत्तेनतस्याएवतथाभावात्।अप्यास्तु

फलाभावेन प्रवृत्तिविषयत्वायोग्यत्वात् । फलवत्त्वे न चायोग्यत्वे प्राणापानानुपपत्तिः तावता प्रसंचारानुकूलयत्नयोग्यत्वाभावात् । न
तु संचारानुकूले तद्योग्यत्वस्यानवयत्वकृतिसाध्यताज्ञानेन ततः साकृतिरिति जीवनयोनयत्नकृतिसाध्यताज्ञाना नाऽदृष्टनिवृत्त्यपक्षसापादनेकप
मितिवाच्यं । कृतिमात्रसाध्यताज्ञानेऽसत्यतिप्रसंगापादनादुक्तक्रमेण हेतुतायां तादृशज्ञानं विनापि जीवनयोनियत्नोपलब्ध्यभिचारात् । वि
वादाभावाच्च । न च सामान्यतः कृतिसाध्यताज्ञानेनापि चिकीर्षाविलंबेन प्रवृत्तिविलंबः तस्याप्रत्यायकत्वात् । यद्यपि चेत्स्यादिति तन्तु छ । अ
हे कृतिसाध्यप्राणापंचकसंचारो जीवित्वादित्याद्यनुमानसंभवात् । अत एव भ्रमेप्यतिप्रसंगवारणार्थं विशेषणान्तरोपादानेऽन्यथा तस्मा
प्युक्तक्रमेणावारणात् तदपि न क्रियेतेति भावः । वयं तु कृतिसाध्यताधीरेव हेतुरन्यत्तूक्ता उक्तविशेषणापेक्षा तथाहि चिकीर्षाधीनकृतिसा
ध्यताज्ञानस्य हेतुत्वेपि प्रकृते चिकीर्षाधीनाकृतिर्योग्यैव विषयस्वभावादिस्यवबीजं । तथा च कृतिसाध्यताधीरेव चिकीर्षाधीनकृतेः का
रणं । तथा च तथाज्ञानेप्युक्तस्थले न चिकीर्षाधीनाकृतिरयोग्यत्वादुपस्थले प्याद्यपातुतत्तत्ज्ञानमहेतुरेव तत्कातिप्रसंगः । न चान्वय
व्यभिचारस्तादृशविषयविशेषविलंबादेव विलंबात् । अन्यथा भ्रमेण चिकीर्षाधीनकृतिसाध्यताज्ञानेनापि चिकीर्षायामपि प्राणापंचकसंचारे
प्रवृत्त्यापत्तेर्वज्ज्वलेपत्वादिति । ननु चिकीर्षाधीनत्वं न ज्ञाने प्रयोजकं । अपि तु स्वरूपसत् । अतः कथं चिकीर्षाधीनकृतिसाध्यमपि तादृशकृति

साध्यत्वेन बुध्येतेति न्यूनमनिर्वचनोत्तिप्रसंगइतिचेन्न । नच चिकीर्षाधीनत्वेनोपलक्षितकृतिविशेषणसाध्यस्यप्राणपंचकसंचारादेस्तत्सा
ध्यत्वभ्रमसंभवात् क्रियाहितादृशो भ्रमः ॥ अचिकीर्षाधीनकृतौ तदधीनत्वभ्रमात् चिकीर्षाधीनत्वं यस्यां कृतौ वास्तवं तत्साध्येतत्सा
ध्यत्वभ्रमात् अत्र चिकीर्षाधीनत्वस्योपलक्षणतायां यद्यप्याद्यः कल्पो बाधितः तथापि द्वितीयकल्पस्य प्रसंगे किमपि बाधकं न पश्यामः
। ननु कृतिसाध्यतामात्रज्ञानेपि हितौ प्राणपंचकसंचारे तद्योग्यतया न चिकीर्षाधीनत्वमित्यतएव परमार्थतः कृतित्वेन रूपेणान्ता
न्तविशेषकृतिरेव प्रवर्तकज्ञाने विषयइतिचेन्न । सत्यं । एवं चेत् उक्तविशेषणाप्रवेशात् हि उपायविषयत्वमपि विशेषणाप्रवेशपक्षेतद्वृ
त्तिगत्यातादृशकृतिसाध्यताज्ञानस्य च प्रवर्तकत्वपर्यवसानात् । एवं च स्वेच्छाधीनत्वमपि विशेषणमनावश्यकं भ्रमस्य स्वतयाइच्छा
प्रसयोग्यत्वादेव तत्रातिप्रसंगाभंगात् । अन्यथा सुखेतिप्रसंगासंभवात् । तद्वृगाय उपायविषयत्वस्य विशेषणाप्रवेशायत्नेनकृतत्वात् ।
न चान्वयव्यभिचारः सिद्धेच्छाभावइव विषययोग्य विलंबादेव विलंबात् । न चतत्रासिद्धत्वेतानविलंबादेवविलंबइतिवाच्यं तद्दिहा
पितादृशकृतिविषययोग्यत्वज्ञानस्यहेतुत्वोचित्यात् न हि कश्चित् ज्ञानस्यापि विषयकृतं किंचिद्वैलक्षण्यमीक्षामहे इत्यलमधिनेकेमति
॥ अनुगतेति । अनुगतेकारणे चिकीर्षालक्षणे उपाधिः अयं प्रयोजकत्वप्रसक्तत्वमन्तिमइतियावत् । न तु कारणानुगतोपाधिस्तज्जन्यत्वे च

त्येतद्भूमत्वस्यानवच्छेदकत्वात्। नन्वन्यत्रेति। विशेषस्यावच्छेदकत्वे तु न दोषः। कार्यतावच्छेदकाननुगमस्यादोषत्वादिति भावः। किंचेत्यादि
नोक्तं दोषं परिहरति। एवमिति। परिचायकतयेति। परिचायकतावच्छेदकमस्तु स एव धर्मो यदवच्छेदेन कृतिसाध्यत्वग्रह इति भावः। भ्रमेणेति।
यच्चिकीर्षाधीनकृतिसाध्यत्वेन ज्ञायते तच्चिकीर्षाविषयो न तु तदधीनकृतिविषय इत्युक्ते न पक्वान्नाच्चिकीर्षाधीनकृतिविषयः भ्रमेणापि स्या
दित्यर्थः। नच भ्रमः फलं कृतिस्तु क्रियागोचरेति नातिप्रसंग शंकेति वाच्यं एवमपि स्तुत्वद्ववचिकीर्षापत्तेर्व ज्वलेपलानन मुक्तेनपक्वानाति
रिक्तमस्माकमिव तस्यापि चिकीर्षाहेतुरस्तीति भावः। कृतेरिति। यद्यपि नायं नियमः स्वपूर्ववर्त्तिगुणान्तरध्वंसे कृतेर्जनकत्वात् तथापीष्टतिरे
मजनकत्वे नियमो द्रष्टव्यः। न च विरोधिगुणत्वेन तथाभावात्। तत्त्वव्याप्त्यन्तरवर्त्तिसमानाधिकरणयोग्यविशेषगुणत्वमिति न काप्यनुपपत्तिरिति
नहीति॥ न च सामान्यनियमे को दोष इति वाच्यं। यत एव सुखचिकीर्षा न हेतुरतस्तां विनापि कृतिरित्युभयसिद्धमिति सुखविशेष एव
मपि व्यभिचारादिति भावः। शत्रुवधस्येति॥ न च विनिगमकाभावो यत्र द्वेषस्तदभावे इच्छा यत्रेच्छा तदभावे द्वेष इति समनियमादिति वाच्यं।
प्रतियोगिविषयद्वेषस्य भिन्नविषयतया गौरवेणावच्छेदकत्वात् किंतु लाघवेन समानविषयकेच्छाया एव। न चैवं तद्भिन्नद्वेष एव हेतुरस्तु
त्वे पुनरुक्तेरिति वाच्यं इष्टत्वात्। तदुक्तं मायकुसुमाञ्जलौ॥ रागद्वेषाविनाभावात् प्रवृत्तिनिवृत्त्योरिति। न च तदभावे प्रवृत्तिरेव तन्निवृत्तिः

मि॰श्रा॰ ५९ ।विषयवैलक्षण्यानुभवात्।प्रयत्नयोगपद्यस्य च वैलक्षण्य एवं संभवात्। न चेष्टसिद्धिरित्यादिग्रन्थविरोधः। यदि द्वेषो नाम मनात्म
गुणः कश्चित्प्रत्यक्षः स्यात्तदा निवृत्तिकारणं कस्तं कल्पयेत्। अन्यस्यैवादृष्टत्वकल्पस्यापि निवृत्तौ कार्यताकल्पनप्रसंगादिति प्रत्यक्षसिद्धि
द्वेषनिमित्तस्यैव निवृत्तिकारणत्वेन कल्पनमित्यनुभवालंवनमित्यत्र तात्पर्यात्। न चैवं ततोऽपि भ्रमे पूर्वपक्षाप्रतिक्षेप इति वाच्यं। निवृत्ति
प्रयत्नस्य क्रियाप्रत्यजनकत्वेन घ्रमजनकत्वस्य शंकानास्पदत्वात् प्रवृत्तिहेतुत्वस्यैव द्वेषे शंकितत्वादिति न काप्यनुपपत्तिरिति। आ
वनयोनीति। यद्यपि चिकीर्षाधीनकृतिमात्रादपि न भ्रम इति विशेषणस्तादृशो वाच्यस्तथा च जीवनयोनिकृतिविशेषण एव तथास्त्विति माप्य
परीहारस्तथापि चिकीर्षाधीनकृतौ क्रियाविशेषजनकविषयवैलक्षण्यात् भ्रमः। न च जीवनयोनियत्ने तथेति वाच्यं। जीवनयोनीयत्ने
जीवनस्यात्ममनोयोगस्यैवैजात्यप्रयोजकाभावेनैकरूपतया वैजात्यस्य मानाभावाच्चेति भावः स्वेष्टेति। यद्यपीष्टसामान्यसामग्र्यभावा
देव चिकीर्षालक्षणविशेषकार्याभावोऽभ्रमेव दुःखमयेयसामान्यसामग्र्यभाव एवेष्टुचितं तथाप्युपाये पाकादावेव चिकीर्षा न स्यात् सा
मान्यसामग्र्यभावात्॥ न त्वस्मन्मते द्वेषाणामपीष्टसाधनताधी॥ इष्टसामान्यसामग्रीसंयकल्पत्वाद्दियत इति भावः स्वेति॥ यद्यपीष्टव स्म॰
त्तिकार्यत्वे स्वेच्छाधीनत्वं स्वचिकीर्षाधीनत्वं चावगाहते उपलक्षणं कृतिविशेषकृतित्वेनैव तायमानेन वस्तुत एतदुभयमस्तीति किं लाघवेन ५९

तथापि कारणतावच्छेदकतया तत्र धर्मान्तरमवश्यं ग्रहीतव्यमिति तत्र लाघवावतारो द्रष्टव्यः ॥ अन्येत्विति स्वरसोद्भावनं तद्बी
जं तु यद्यद्रूपत्वविशिष्टकृतिसाध्यत्वमिति यथाश्रुतोर्थः तदाकुतः श्रमवारणमेकस्या एव कृतेः भयजनकत्वव्यवस्थापनात् ॥ अथे
द्रूपकृतित्वेन जनकत्वमत एवोक्तं कृतिमात्रेत्यादि तदाजीवनयोनिकृतितोपि श्रमायत्तेरित्युक्तमेवावर्त्तत इत्यादि चिन्त्यम् ॥ अत इति ॥
यत एव कृतिमात्राच्छ्रमो तत एव कर्मकार्यं यावत्तमेव कष्टश्रमसंवलितमिति सार्वलौकिकोनुभव इति भावः ॥ कृष्टेति ॥ सुखेच्छायामवच्छे
दकं तया सुखत्वमिव दुःख्यादिकमपि तथैव विषय इति भावः चिकीर्षाजन्यकृतिसाध्यताज्ञानं प्रवर्त्तकं तत्र चिकीर्षाधीनत्वविशेषणा
जन्यत्वे चिरादकृते तदुपन्यस्य दूषयति विषेति ॥ संज्ञातेति ॥ यद्यपीदानीं स्वेच्छाधीनमत्कृतिसाध्यताज्ञानं प्रवर्त्तकं संजातत्वावस्थना
स्त्येव तस्मादिदानीं तत्रेच्छाभावात् तथापीदानीमिति नेच्छाविशेषणं वारणीयमभावियो क्वनराजस्यापीदानीमिच्छाधीनकृतिसाध्यत्वादपि
तु कृतिविशेषणात् तथा च संजातत्वाभावेपीदानीं तनी स्वेच्छाधीनायाः कृतेः तत्साध्यमिदमिति जानात्येवेति भावः ॥ नवेदमपि ज्ञानं चिकीर्षा
जनीयत्वात् प्रवृत्तिं जनयेत्तत्रावेच्छासामान्यसामग्र्यभावादेवेत्युत दृष्टितेनो हन्वेति वाच्यं ॥ तन्मते तावन्मात्रस्य चिकीर्षासामग्रीत्वमित्युक्त
त्वादिष्टफलमनेनेति ॥ आद्यप्रवृत्तो व्यभिचारमस्य वाहवस्तु तइति ॥ नचेदानीं कृतिसाध्यत्वं चेदनुभाव्यमाविर्योवनराज्यप्रवृत्तसति

मि॰श्रा॰ प्रसंगभंगायतर्हिनलिंगांतरेणाग्रहेनचातिप्रसंगस्तदामत्कृपभावेनबाधादिस्पष्टेचेणाहृलिंगेतितथाचेदानींमत्कृतिसाध्यताना
५० नेहेतुर्वाच्यः।सचोक्तानुमानाचभावेपिप्राग्उपजाततादृशानुभवप्रभवस्मृतिरस्त्येवेतिकथनप्रवृत्त्यापत्तेः॥नचतदातनमत्कृतिसा
ध्यत्वमिदानीमित्याकारेणानुभवेमातमतेनुभवसमानविषयत्वात्स्मृतेरपिसकालोविषयइत्यधुनाप्रवृत्त्यापादनमयुक्तमितिवाच्यं।
स्मृत्यापिस्वकालस्यानुभवागोचरस्यैववर्त्तमानसामान्यसामग्रीमहिम्नाविषयीकरणादतीतत्वाद्यगोचरवर्त्तमानस्यप्रवर्त्तमानसमयविषय
तानियमात्स्मृथास्वघटइत्यादिस्मृतितोऽप्रवृत्त्यापत्तेरितिभावः।स्वेतिस्वस्यप्रवर्त्तमानपुरुषस्यपविशेषणांतवर्त्ततवर्त्तमानमानतप्रति
संधानजन्यमित्यर्थः।नवातिप्रसंगोमदीयेदानींतनेच्छाविषयसाधनत्वगुविलसमानाधिकरणविहितकालज्ञावच्छेद्यतिसंधानासक
विशेषद्वयसामग्रीसहितायाएवतच्छ्याजनकत्वान्नचेदमुभयविषयमक्षरणादेतत्फलेतदानींतनतदिच्छापात्त्रभावादितिभावः।एत
त्संध्यायामितिइदंतुप्राथमिकमनुमानंनत्वेतदेवयथाश्रुतंप्रवर्त्तकानुमानं।प्रवृत्तिविषयविशेष्यकत्वानस्यैवप्रवर्त्तकत्वात्।किंतना
नुमानेसतिसंध्यायामिदानींतनमत्कृतिसाध्यंमत्कृतिनिष्टहेतुताप्रतियोगिककार्यताधिकरणत्वादित्यनुमानं।नचासिद्धिःसमान शम॰
विभिन्नविघततयाप्रथमानुमानेनतत्कृत्वादत्तएवप्राक्कारपेक्षा॥पद्य।उक्तानुमानानंतरंमानसएवतद्विशेष्यकानुभवोवायोसौतमिसनुभ ५०

वो।वायो।सीता।मित्यनुभवानंतरं शीतो वायुरित्यादिवदिति भावः। ननु स्वविशेषणावत्ताप्रतिसंधानजन्यत्वापेक्षया विषयतयेष्टसाध
नत्वेन लघुतरमित्यत्युक्तौ तत्प्रतिसंधानजन्यत्वस्य तत्र दुर्वहितो त्तावर्त्तितत्वपरत्वात् समानकालमात्रपरत्वाद्वा। अन्यथाकृतिसाध्यता
स्यैतत्प्रवर्त्तकतापत्तेः स्वविशेषणावत्त्वप्रतिसंधानजन्यत्वयोगपद्यस्य विवक्षितत्वाद्वा। तदवच्छेदकं चरूपमसंजातवाधात् मधुकृषीय
कार्यतोत्तानत्वमेव एतस्यनूपस्यात्रापि सत्वात्। तथा वेष्टसाधनत्वमेवानमथासिद्धत्वनियमयोः प्रवेशाज्जुकृतोरमित्यत्र तृचेणावश्यक
तयात्तस्य प्रामाणिकत्वयोगौरवदोषायेसाभिसंधाय तदावश्यकत्वं यतो किंचेति। असिद्धेति। साध्यत्वमसत्वगर्भसाधनत्वं च पूर्वं सत्व
न्नेपतयासत्वार्थे मिसेकृद्दैवकोनेवावसत्वासत्वेहुग्रहेइति भावः। स्वनूपगतत्वपदि स्वनूपावच्छिन्नत्वं तदाहयदीति। अथ स्वनूपमा
वच्छेदेन सत्वात् हात् तदवच्छेदकमुक्तनूपमेव मुक्तदोषानिवृत्ते। तदाह। भिन्नेति। समर्थयति। नन्विदमयुक्तं।। साध्यत्वात् तदवच्छेदकसंबंधयो
स्तैवासंभवाद्धर्मिणस्तावासत्वात्। न हि वृक्षे ऽवर्त्तमानायाऽपि शाखायास्तत्रसंयोगावच्छेदकत्वमेव। अवच्छेद्यसत्वस्यावच्छे
दकत्वात्। यत्रावच्छेद्यधर्मिणि तत्सत्वं तत्रावच्छेदकमपि तथा। यत्रत्वच्छेद्यमसत्त्वपि धर्मिणि ज्ञानादिवत्तत्संबंधं तत्रावच्छेदकम
पि तथैवेति तत्संबंधस्यापि कालस्यावच्छेदकत्वमिति भावः। ननु यदा यद्याहृतिसाध्यतावच्छेदकं तदिष्टसाधनमिति नवस्वानुमानं

मि०मु० शक्तो वा। अन्यथा यत्नत्वस्य संकेतेऽप्यननुगमाद् शक्यग्रह इत्यत आह गौरवाच्चेति। यद्यपि परपक्षेपीदानींमतं भावः तथाप्यग्रेतन
५१ भावाभावात् लाघवमिति भावः॥ ननु कारणतावच्छेदकावच्छिन्नेकारणत्वमिति कृतिसाध्यत्वविशिष्टसाधनत्वमित्यसंदर्भमेव तदिति
कुतो विरोध इति समाधिमाशंक्य निषेधति न चेति। नहीति। उक्ते गौरवाच्च स्तत तत्तथाभावे पि कृतिसाध्यत्वधारश्यामतत्प्रकारः स्तत्वा
वच्छेदकात्वमसंभवात्मेवाकारणत्वस्य सत्वगर्भे तयोर्विरोधस्यानुद्धारादिति कारणकत्वबाध्यं न सप्रवर्तकतायामनुपपत्तेः। इ
त्यनंतरमभिष्पत्वप्रकारवैशिष्ट्यस्य निर्वाहकत्वादिति भावः ननु हन्तेः कपिसंयोगी तदभाववांश्चेति न्यायेन एकधर्मे युगपत्सहारस्तयोः संभ
वे समर्थवैदृष्टान्तरमाह किंचेति। तत्साध्येति तत्साध्यत्वप्रकारकेच्छा भवति। अवच्छेदकत्वेन सुखत्वमिव दृष्टिमपि विषयीकरोत्येवेति भा
वः। तत्साधनेष्टवलवदनिष्टाननुबंधितत्साधनत्वेन ज्ञाते पुंत्वेन विसंवादिफलसंग्रहः। उक्तायाः सामान्यसामग्र्याः त्वादिति भावः। तदे
वेति। कृतिसाध्यत्वसहितमिति शेषः। तथा च विषभक्षणस्य तदानीं दुःखसाधनत्वज्ञानान्नेष्टत्वमस्तीति नातिप्रसंग इति भावः। ननु
सुखदुःखयोर्वध्यघातकभावः रेकाप्यदमपि न। तयोः स्वसाक्षात्कारनिवर्त्यत्वादित्यभिविरोधपदार्थमाह॥ एकेति। यद्यपि यथा राम०
ऽन्तस्य दुःखसामग्र्यामप्यतिव्याप्तिः तस्याः अप्येककालदुःखासमानदेशत्वादिति दुःखपदं द्वेषविषयपरं तथा च तद्विरोधाद्वेष ५१

विषयत्वाभावाच्छेदकधर्म्मेवत्वं शक्यनिर्वचनमेव। तथापि। क्षेपोपिकथमननुगतेषु तेष्विति तत्राप्यनुद्देश्यत्वं नामोक्तगत्या धर्म्मान्तरं वाच्य
मिति विनिगमकाद्रिरमुद्देश्यत्वमेवानुगमकमङ्गीकृतमिति भावः। नन्वद्देश्यत्वनिरूपाधिकतयैव स्वतइति स्यादित्यस्वरसं वेरा हा। किं चेति॥ नन्वे
वं कृतसजन्यतयाप्राप्यश्चित्तादेः कथं दुःखपुसादचिकीर्षयाप्रवृत्तिरित्यत आह। कृतीति। यथावेतन्नथोक्तमन्यत्रेति भावः। पाकोमत्कृतीति। पाक
इदानीं स्वेच्छाधीनमत्कृतिसाध्यः। इदानीमिच्छाधीनमत्कृतिव्यतिरेकासत्वे सति इदानीं तनमदिच्छाविषयसाधनत्वात्। यद्यदा यदिच्छाधीनय
त्कृतिव्यतिरेकासत्वे सति यदा तनयदिच्छाविषयसाधनं तत्तदा तदिच्छाधीनतत्कृतिसाध्यं यथा मत्कृतिसाध्यं भोजनमिति। अत्र मत्कृतिसाध्यं भोजनं।
यस्मात् दृतिच हुलकालोपाध्युपसंहारे नतु स्थाप्यतिन विरोधः। नचैवं समसंतमात्रगमकत्वेत्रोपवैयर्थ्यं। तन्मन्यभोजनेसंजातवाधस्यविषभक्ष
णेव्यभिचारवारकत्वात्। तद्विने तदा स्वेच्छाधीनतत्कृतिसाध्यं अथ च नवतीच्छाधीनतत्कृतिव्यतिरेके। मत्कारणाभावे कार्याभावनियमात्। कृतिसा
ध्यस्य चजीवनयोनिकृसजन्यस्वेच्छाधीनवृत्तिजन्यत्वनियमात्। नवादाहृतहृतव्यं तदा तनतदिच्छाविषयसाधनं तत्फले तदिच्छाभावात्। विशेष्य
मात्रे च हृष्यादे प्राणापचकसंवारे वास्तीति तदुभयव्यभिचारवारणाय समस्तमिति विशिष्टमुपात्तं तत्रापि हृष्यादेतद्वारणाय कृतिमात्रमन्यत्र तेद्वा
रणार्थं मिच्छाधीनेति। परकीयतद्वारणाय मदिति। इयत्तरमत्रावधेयं। यथा माध्येत्वं तमविस्तथानहेतावपि तद्दृत भावः। तथा सति स्वेच्छाधी

मि॰ग्र॰ ५२ नञ्कृतिव्यतिरेकासत्त्वंयस्यपदात्तदोस्वेच्छाधीनकृतिसाध्यत्वमित्यत्रव्यभिचाराभावेनशेषवैयर्थ्यापत्तेः।इदानीमितितुहेतावपिप्रवेशनी
यः।अन्यथाव्यभिचारात्।भाविनोवनगाद्यादीनामिच्छाधीनमत्कृतिव्यतिरेकासत्त्वेमदिष्टसाधनानामिदानींस्वेच्छाधीनमत्कृतिसाध्य
त्वाभावात्।यत्तुसामान्योपसंहारेणाविशेषसिद्धिफलेननतुविशेषप्रसिद्धिरपेक्ष्यामितिप्राचीनमतेनेदमनुमानमितिविशेषाप्रसिद्ध्यादिना
शंकनीयमिति।नचेदानींतनमदिष्टविषयत्वपर्यंतंयदिहेत्वर्थस्तदामधुविषसंपृक्तान्नभोजनेव्यभिचारवारणायबलवदित्यादिकमर्थवन्नवि
शेषणाविरुध्येतेतिवाच्यं॥इष्टपदेनेच्छाविषयतावच्छेदकावच्छिन्नत्वस्यविवक्षितत्वात्तत्राप्रसिद्धत्वेसतिमधुभोजनजन्यसुखत्वादि।अस्तिच
मिलितभोजनेऽपिमधुभोजनत्वेतज्जन्यसुखत्वेऽसिद्धत्वेचानचतन्मध्यसिद्धेभोजनजन्यसुखेअसिद्धत्वं॥नचविषलक्षणोऽनिष्टसंवलनानियमादि
च्छाविरोधित्वनियमेनेच्छाविषयतावच्छेदकरूपेनतुमधुभोजनमप्यनिष्टविषभक्षणासंवलनेनियतमतोमधुभोजनत्वेतदवच्छेदकमितिसाधुव
त्वेवादितिविशेषणं॥नचविषभक्षणजन्यदुःखासमभिव्याहृतमधुभोजनजन्यसुखत्वेनतत्रेच्छेतिवाच्यं॥स्वतःपुरुषार्थत्वहान्यापत्तेः।इष्टोत्पत्तौदुःखा
समभिव्याहृत्वापेक्षणात्।अतएवचबलवदनिष्टाननुबंधित्वमन्येपिप्रवर्तकज्ञानेनिवेशयति।अन्यथेष्टसाधनत्वमात्रेणैवमधुविषसंपृक्ता
न्नभोजनेवारणात्तत्रापिबलवदिष्टसाधनत्वपादेयंस्यात्॥बलवदनिष्टाननुबंधित्वंचेदानींतनबलवद्द्वेषविषयदुःखाजनकत्वं।द्वेषश्चबल राम॰ ५२

वत्वं जातिविशेषः अत एव रागांधस्य न तादृशो द्वेषो दुःखे इति भवति तेन द्वेषादपि प्रवृत्तिः इदमेव चेदानीं तन्नत्वेन द्वेषविशेषणं प्रयोजनमन्य
थारागरागाभ्यां तद्दुःखेऽपि द्वेषातिशयानतिशयदर्शनाद् इत्सिद्धो हेतुः स्यात् कंटकविनाशदुःखजनकत्वात् नच द्वेषे बलवत्त्वमधिकं ॥ दु
ःखमात्रस्यैव द्वेषविषयत्वेनाप्रसिद्धिवारकत्वात् योगिनामपि सुखदुःखयो रागद्वेषसम्भवात् अन्यथा प्रवृत्तिनिवृत्त्योरसम्भवापत्तेः नेवास
नेऽइत्यादिविरोधः अस्मदादिसाधारणात् केरागद्वेषविरहपरत्वात् अन्यथा दुःखमात्रस्य द्वेषाविषयत्वे दुःखस्य सोपाधिद्वेषविषयत्वेन तदभा
वस्य निरुपधिपुरुषार्थत्वहान्यापत्तेः एवं च यथाश्रुते नैव समंजसे हेतौ समर्थविशेषणतात्पर्येन साध्येऽपि बलवदिष्टादिविशेषणाप्रवेशनो
यमिसयथाख्यानं ॥ नव बलवदनिष्टाननुबंधीदमितिज्ञानेः प्रकृसातेदननुबंधित्वमितिसाध्यताज्ञानस्य प्रवर्त्तकत्वेनावश्यं साध्ये विशेषणप्रवे
श इति वाच्यं ॥ एतावतापि ज्ञानाभावमात्रस्य हेतुत्वलाभात् तदननुबंधित्वज्ञानस्य तेः प्रवर्त्तकत्वानंगीकारात् यत्तु तदननुबंधित्वमिष्टासन्नि
नांतरीयकदुःखाधिकदुःखाजनकत्वं तथा च तादृशकृतिसाध्यताधीर्यदि प्रवृत्तिसामान्यसामग्री तदा नित्ये प्रवृत्तिर्न स्यात् इष्टपदस्यत
त्रोऽप्यरतया प्रसिद्धेरिति तदननुबंधित्वधीर्न प्रवर्त्तिकेति ॥ तत्रानुष्ठानेऽर्त्ति नांतरीयकदुःखाधिकदुःखजनकभिन्नत्वज्ञानस्य नित्येऽपि सं
भवात् तथा च तद्धेतोरितिन्यायादेव तदनुबंधित्वज्ञानाभावो हेतुर्न तु तदननुबंधित्वज्ञानमिति न साध्ये विशेषणप्रवेशः ॥ वस्तुतस्तु बलवद

मि॰ग्रा॰ निष्टसाधनत्वज्ञाने उक्तलिंगककार्यताज्ञानाभावादेव न प्रवृत्तिरिति तत्प्रतिबंधकत्वाभावात्तदभावे हेतुत्वमपि दुर्लभं। न च नित्यानुरोधात्तथा
५३ तत्राप्यस्य लिंगविशेषणत्वात्। उक्तसाध्यस्य तादृशज्ञानकाले बाधेन व्यभिचारवारकत्वाच्च। न च कृतित्वेनैव कृतिविशेषधीः प्रवर्त्तिकेति सिद्धां
तिता। तथा च कृतिसाध्यमित्येव साध्यमिति विशेष्यकृतेर्विषयत्वेऽपि कृतित्वमेव व्यापकतावच्छेदकमिति कृतसत्यव्यभिचारोऽपेन विशेषणान्तरोपा
दानमिति वाच्यं कामना लिंगकस्य न प्रवर्त्तकत्वानुरोधेनोक्तसाध्यास्याव। न हि कृतित्वेन ज्ञातं यत्प्रयोजकं तद्विशेषणान्तरप्रवेशेन प्रवर्त्तकमिति
संभवति। प्रयोजकत्वापादकरूपं तु विशेषणान्तरप्रवेशेन प्रयोजकताव्यभिचारादिति निगर्व इति संक्षेपः॥ यस्येति॥ उपलक्षणमेतदेव
हेतुत्वेऽपि प्रयोज्यमिति भावः। ननु मत्कृतिव्यतिरेकेणासंदृष्टसत्ता सदेव स्यादिति कुतः कृतिसाध्यतेत्यत आह॥ असिद्धेति॥ तथा च हेतुत्व वि
विशेषदर्शनादेव सिद्धत्वे सिद्धत्वे सिद्धत्वेऽसिद्धे विशेषणनिषेधात्परिशिष्टकृतिसाध्यत्वपर्यवसानमित्यर्थः॥ कृतेति॥ वर्त्तमान इत्यर्थः ननु सामा
न्यव्याप्तौ व्यभिचारो विशेषव्याप्तौ वा नाद्य इत्याह सामान्यत इति। नान्त्य इत्याह। अतीतेति तथा चेदानीं कृतिसाध्यश्चेत्तत्र साध्याभावेऽपि हेत्वभा
वादेव न व्यभिचार इति भावः। यत एव मत्कृतिव्यतिरेकासत्त्व इति विशेषणम् अत एव न स्थलान्तरेऽपि व्यभिचार इत्याह। अत एवेति। विशेष्याभावा ए॰म॰
देव तत्र न व्यभिचार इत्येकदेशिमतमुपन्यस्य दूषयति। यस्येति॥ ननु सामग्र्येव मानमित्यत आह। प्रवृत्तीति। तथा च सामग्र्येवेति भावः॥ लिंगेति ५३